# अध्याय ३

**पदभाष्यावतरणिका**
**आख्यायिकायाः प्रयोजनम्**

१) अविज्ञातं विजानतां विज्ञातमविजानताम् इत्यादि-श्रवणाद्, यदस्ति तद्विज्ञातं प्रमाणैः, यन्नास्ति तदविज्ञातं, शश-विषाण-कल्पमत्यन्तमेवासद् दृष्टम्।

तथेदं ब्रह्म अविज्ञातत्वाद् असदेवेति मन्द-बुद्धीनां व्यामोहो मा भूदिति तदर्थेयमाख्यायिका आरभ्यते।

तदेव हि ब्रह्म सर्व-प्रकारेण प्रशास्तृ, देवानामपि परो देवः, ईश्वराणामपि परमेश्वरः, दुर्विज्ञेयः, देवानां जय-हेतुः, असुराणां पराजय-हेतुः, तत्कथं नास्तीत्येतस्यार्थस्यानुकूलानि ह्युत्तराणि वचांसि दृश्यन्ते।

२) अथवा ब्रह्म-विद्यायाः स्तुतये। कथम्? ब्रह्म-विज्ञानाद्धि अग्न्यादयो देवा देवानां श्रेष्ठत्वं जग्मुः। ततोऽप्यतितरामिन्द्र इति।

३) अथवा दुर्विज्ञेयं ब्रह्म इत्येतत् प्रदर्श्यते येन अग्न्यादयोऽतितेजसोऽपि क्लेशेनैव ब्रह्म विदितवन्तः, तथेन्द्रो देवानामीश्वरोऽपि सन्निति।

४) वक्ष्यमाणोपनिषद्-विधिपरं वा सर्वम्।

५) ब्रह्म-विद्या-व्यतिरेकेण प्राणिनां कर्त्तृत्व-भोक्तृत्वाद्यभिमानो मिथ्या इत्येतद् दर्शनार्थं वा आख्यायिका। यथा देवानां जयाद्यभिमानः तद्वदिति।

**३.१**

**ब्रह्म ह देवेभ्यो विजिग्ये। तस्य ह ब्रह्मणो विजये देवा अमहीयन्त।। ३.१**

ब्रह्म यथोक्त-लक्षणं परं ह किल देवेभ्यः अर्थाय विजिग्ये जयं लब्धवत्।

देवानामसुराणां च सङ्ग्रामे असुरान् जित्वा जगदरातीन् ईश्वर-सेतु-भेतृन्, देवेभ्यो जयं तत्फलं च

प्रायच्छद् जगतः स्थेम्ने।

तस्य ह किल ब्रह्मणो विजये देवाः अग्न्यादयः अमहीयन्त महिमानं प्राप्तवन्तः।। ३.१ ।।

**आनन्दगिरिटीका**

उत्तरग्रन्थस्य प्रतीकमादाय तात्पर्यमाह - **ब्रह्म** इत्यादिना। अभिप्रेतं (मुख्यं) तात्पर्यमाह - **वक्ष्यमाणेति**। उत्तमाधिकारिगोचरम् (तन्निमित्तं तदुद्देश्यकम्) अविषयं (ब्रह्मात्मनो यत्र विषयतया न भानम्) ब्रह्मात्मताज्ञानं पूर्वत्रोक्तम्। उत्तरत्र तु मन्दाधिकारिगोचरं सगुणब्रह्मोपासनं वक्ष्यते। तत्परं (वक्ष्यमाणसगुणब्रह्मोपासनविधेः अर्थवादविधया शेषभूतमिति यावत्)। वक्ष्यमाणं सर्ववाक्यजातं स्पष्ट-विधि-दर्शनात्। अतः अत्रैव तात्पर्यम्, अर्थान्तर-तात्पर्य-प्रदर्शनं तु सम्भावनामात्रेण इति द्रष्टव्यम्। ईश्वरस्य सेतवो मर्यादा वर्णाश्रमादिधर्माः तद्भेदकान्। जगतः स्थेम्ने स्थैर्याय। (१)

**वाक्यभाष्यम्**

**यक्षोपाख्यानस्य प्रयोजने विकल्पाः**

ब्रह्म ह देवेभ्यः इति -

**सूत्रवाक्यम्**

१) ब्रह्मणो दुर्विज्ञेयतोक्तिः यत्नाधिक्यार्था।

**विवरणवाक्यम्**

समाप्ता ब्रह्म-विद्या यदधीनः पुरुषार्थः। अत ऊर्ध्वमर्थवादेन ब्रह्मणो दुर्विज्ञेयतोच्यते। तद्विज्ञाने कथं नु नाम यत्नमधिकं कुर्यादिति।

**सूत्रवाक्यम्**

२) शमाद्यर्थो वा आम्नायोऽभिमानशातनात्।

**विवरणवाक्यम्**

शमादि वा ब्रह्म-विद्या साधनं विधित्सितं, तदर्थोऽयमर्थवादाम्नायः। न हि शमादि-साधन-रहितस्य अभिमान-राग-द्वेषादि-युक्तस्य ब्रह्म-विज्ञाने सामर्थ्यमस्ति, व्यावृत्त-बाह्य-मिथ्या-प्रत्यय-ग्राह्यत्वाद् ब्रह्मणः। यस्माच्च अग्न्यादीनां जयाभिमानं शातयति, ततश्च ब्रह्म-विज्ञानं दर्शयति अभिमानोपशमे, तस्मात् शमादि-साधन-विधानार्थोऽयमर्थवाद इत्यवसीयते।

**सूत्रवाक्यम्**

३) सगुणोपासनार्थो वा, अपोदितत्वात्।

**विवरणवाक्यम्**

नेदं यदिदमुपासते इत्युपास्यत्वं ब्रह्मणोऽपोदितम्। अपोदितत्वाद् अनुपास्यत्वे प्राप्ते तस्यैव ब्रह्मणः सगुणत्वेन अधिदैवमध्यात्मं चोपासनं विधातव्यमित्येवमर्थो वा। इत्यधिदैवतम् तद्वनम् इत्युपासितव्यम् इति हि वक्ष्यति।

**आनन्दगिरिटीका (१-१२)**

यः सुराणां जये हेतुः असुराणां पराजये। सत्त्वप्रधानया शक्त्या सम्पन्नः सोऽहमीश्वरः।। इति।

ब्रह्म ह इत्याद्याख्यायिकास्तात्पर्यं संगृहीतं विवृणोति - **समाप्ता** इत्यादिना। तात्पर्यानन्तरमाह - **शमाद्यर्थो वा** इति। संग्रहवाक्यं विवृणोति - **शमादि वा** इति। अभिप्रायान्तरमाख्यायिकायाः संगृह्णाति - **सगुणेति**। संगृहीतं विवृणोति - **नेदम्** इत्यादिना।

**ब्रह्मपदाभिप्रायः**

**ब्रह्मपदाभिप्रायः**

**सूत्रवाक्यम्**

ब्रह्मेति परो लिङ्गात्।

**विवरणवाक्यम्**

न हि अन्यत्र परादीश्वराद् नित्य-सर्वज्ञात् परिभूयाग्न्यादीन् तृणं वज्री-कर्त्तुं सामर्थयम् अस्ति। तन्न शशाक दग्धुम् इत्यादि-लिङ्गाद् ब्रह्म-शब्द-वाच्य ईश्वर इत्यवसीयते। न हि अन्यथा अग्निः तृणं दग्धुं नोत्सहते, वायुर्वा आदातुम्। ईश्वरेच्छया तृणमपि वज्री-भवति इत्युपपद्यते।

कृत्स्नाख्यायिकायास्तात्पर्यमुक्त्वा ब्रह्मशब्दार्थमाह - **ब्रह्मेति परो लिङ्गात्** इति। एतद्व्याख्याति - **न ह्यन्यत्र** इत्यादिना।

**ईश्वरस्य सद्भावसिद्धिः**

**सूत्रवाक्यम्**

तत्सिद्धिर्जगतो नियत-प्रवृत्तेः।

**विवरणवाक्यम्**

श्रुति-स्मृति-प्रसिद्धिभिः नित्य-सर्व-विज्ञाने ईश्वरे सर्वात्मनि सर्वशक्तौ सिद्धेऽपि शास्त्रार्थ-निश्चयार्थमुच्यते।

तस्येश्वरस्य सद्भाव-सिद्धिः कुतो भवति इत्युच्यते - यदिदं जगद् देव-गन्धर्व-यक्ष-रक्षः-पितृ-पिशाचादि-लक्षणं द्यु-वियत्-पृथिव्यादित्य-चन्द्र-ग्रह-नक्षत्र-विचित्रं विविध-प्राण्युपभोग-योग्य-स्थान-साधन-सम्बन्धि तद् अत्यन्त-कुशल-शिल्पिभिः अपि दुर्निर्माणं देश-काल-निमित्तानुरूप-नियत-प्रवृत्ति-निवृत्ति-क्रमम् एतद्-भोक्तृ-कर्म-विभागज्ञ-प्रयत्न-पूर्वकं भवितुमर्हति, कार्यत्वे सति यथोक्त-लक्षणत्वात्, गृह-प्रासाद-रथ-शयनासनादिवत्। विपक्षे आत्मादिवत्।

कथं तर्हि ईश्वरसिद्धिः इत्याकांक्षायामाह - **तत्सिद्धिः** इति। ननु श्रुत्यादिभिः ईश्वरे सिद्धे किमिति जगतो नियतप्रवृत्तिलिङ्गानुमानं सूत्रितं तत्राह - **श्रुतिस्मृतिप्रसिद्धिभिः** इति। यावत् तर्केण सम्भवः नानुगृह्यते तावत् शास्त्रप्रतिपन्नोऽपि ईश्वरः न निश्चीयते अर्थवादत्व-शङ्का-प्रतिबन्धात्। अतः शास्त्रार्थस्य ईश्वरस्य निश्चयाय नियमाय (अयमेव शास्त्रार्थः इत्येवम्) सामान्यतः दृष्टम् अनुमानं शास्त्रानुग्राहकरूपं (शास्त्रोक्तार्थसम्भावनारूपम्) सूत्रेण उच्यते। एतद्व्याख्याति - **तस्य ईश्वरस्य** इत्यादिना। अनादिप्रसिद्धकर्तृव्यतिरिक्तं (अप्रसिद्धकर्तृकम्) जगद् धर्मीकृत्य यद्यपि ईश्वरः सिषाधयिषितः (ईदृशं जगत् पक्षीकृत्य यद्यपि ईश्वरः सिषाधयिषितः इति शङ्कानुवादः) तथापि जगतो बहूनि विशेषणानि संसारिविलक्षणकर्तृसम्भावनाय। नैयायिकास्तु व्याप्यस्य पक्षधर्मताबलाद् व्यापकविशेषः पक्षधर्मः सिध्यति ततः स्वतन्त्रमनुमानं ईश्वरनिश्चायकमाहुः। तद्दूषणं प्रकटार्थे द्रष्टव्यम्। सामान्यतो दृष्टं रचयति (स्पष्टयति)। एतद् जगद्भोक्तॄणां (कर्मणां) च विभागं या जानाति तत्पूर्वकं भवितुमर्हति इति प्रतिज्ञा। अत्र जगन्निमित्तादृष्टनिष्पत्त्यर्थो यो जीवानां प्रयत्नः तत्पूर्वकत्वं जगतः सिद्धमिति सिद्धसाधनत्वं वदतां निरीश्वरवादिनां (मीमांसकादीनाम्) निरासाय विशेषणं भोक्तृकर्मविभागज्ञेति। न हि जीवानां एते भोक्तारः अस्मिन् देशे काले वा अस्य कर्मफलस्य इति विभागज्ञानं सम्भवति। विशेषानभिज्ञत्वादित्यर्थः। **यथोक्तलक्षणत्वात्** इति। विचित्रत्वादित्युक्ते व्यभिचारः स्यात्। आत्मादिस्वभाववैचित्र्यस्य प्रयत्न-पूर्वकत्वाभावात् तदर्थं कार्यत्वे सति इति विशेषणम्। कार्यत्वादित्युक्ते अबुद्धिपूर्वकारिकार्ये (उन्मत्तादिकार्ये। तस्मिन् घुणाक्षरन्यायेन वैचित्र्ये तु भोक्तुरेव आदृष्टानुकूलः प्रयत्नः अन्मत्ताद्यन्तर्यामिणः एव वा प्रयत्नः, पक्षधर्मताबलात् सिध्यति इति भावः।) विभागज्ञ-प्रयत्नपूर्वकत्वं नास्ति इत्यनैकान्तिकत्वं स्यात्। तदर्थं यथोक्तलक्षणत्वादिति। यद्विचित्रं तद् विभागज्ञ-प्रयत्नपूर्वकं यथा गृहादि। जानात्येव हि तक्षादिः अयं गृहादिः अस्य स्वामिनो द्रव्यदानादिपूर्वकं वा (चार्थे) अस्य निर्माणमित्थं च इति। ततो न साध्यवैकल्यं यथाशब्दं हि साधनदूषणे। नाभिप्रायवशात् (पक्षे साध्यसमन्वयानुगुणविवक्षितशब्दार्थमादाय साधनदुषणे न भवतः इत्यर्थः)। विपक्षे व्यतिरेके आत्मादिवद् इत्युदाहरणम्। यद् विभागज्ञ-प्रयत्नपूर्वकं न भवति तद्विशिष्टकार्यमपि न भवति। यथा आत्मा-आकाशादि (परमताभिप्रायकम्) इत्यन्वयव्यतिरेकप्रयोगः इत्यर्थः।

**कर्मणः फलदातृत्वानुपपत्तिः**

आक्षेप-सङ्ग्रहः (विवरणमधस्तात्)कर्मण एव इति चेत्।

समाधान-सङ्ग्रहः (विवरणमधस्तात्) न, पर-तन्त्रस्य निमित्त-मात्रत्वात्।

आक्षेपस्य विवरणम् यदिदम् उपभोग-वैचित्र्यं प्राणिनां, तत्साधन-वैचित्र्यं च, देश-काल-निमित्तानुरूप-नियत-प्रवृत्ति-निवृत्ति-क्रमं च, तन्न नित्य-सर्वज्ञ-कर्तृकम्। किं तर्हि कर्मण एव। तस्याचिन्त्य-प्रभावत्वात्। सर्वैश्च फल-हेतुत्वाभ्युपगमात्। सति कर्मणः फल-हेतुत्वे, किमीश्वराधिक-कल्पनयेति, न नित्यस्येश्वरस्य नित्य-सर्वज्ञ-शक्तेः फल-हेतुत्वं च इति चेत्।

विचित्रकार्यत्वमस्तु विभागज्ञ-प्रयत्नपूर्वकत्वं न भविष्यति किं बाधकं जगद्वैचित्र्यस्य कर्मवैचित्र्यादेव सम्भवाद् अतः पक्षे एव (जगति) साध्याभावशङ्कया शङ्कितविपक्षे वर्तमानः हेतुः शङ्कितव्यभिचारः इत्यभिप्रेत्याह - **कर्मण एव** इति। परिहरति - **न परेति**। कर्तृपरतन्त्रस्य कर्मणो निमित्तमात्रत्वात् स्वातन्त्र्येण निमित्तत्वासम्भवात् (स्वतन्त्रः कर्ता - पा.१.४.५४, इक्युक्तेः, कर्मणस्तु कर्तृजन्यत्वाद् न कर्तृत्वमेव सम्भवति इति भावः) कार्यवैचित्र्यस्य भङ्गप्रसङ्गो बाधकः कर्तारमन्तरेण। अतः पक्षे साध्याभावशङ्कानुपपत्तेः न शङ्कितव्यभिचारित्वमिति भावः। संग्रहवाक्यस्य पूर्वपक्षभागं विवृणोति - **यदिदम्** इत्यादिना। यदिदं ईश्वरवादिभिः अपि वैषम्यनैर्घृण्यदोषपरिहाराय कर्मणो जगद्वैचित्र्यहेतुत्वमिष्टं, तत्सम्प्रतिपन्नम् (उभयसम्मतम्)

विहाय अपूर्वः ईश्वरः कल्प्यते धर्मी, तस्य फलहेतुत्वं च धर्मः कल्पनीयः इति गौरवं स्यादित्याह - **न नित्यस्य ईश्वरस्य** इति।

समाधानस्य विवरणम् न कर्मण एवोपभोग-वैचित्र्याद्युपपद्येत। कस्मात् कर्तृ-तन्त्रत्वात् कर्मणः। चितिमत्-प्रयत्न-निर्वृत्तं हि कर्म। तत्प्रयत्नोपरमाद् उपरतं सद् देशान्तरे कालान्तरे वा नियत-निमित्त-विशेषापेक्षं कर्तुः फलं जनयिष्यतीति न युक्तम्, अनपेक्ष्य अन्यदात्मनः प्रयोक्तृ।

आक्षेपः कर्त्तैव फल-काले प्रयोक्तेति चेद् मया निर्वर्त्तितोऽसि। त्वां प्रयोक्ष्ये फलाय, यदात्मानुरूपं फलम् इति।

समाधानम् न, देश-काल-निमित्त-विशेषानभिज्ञत्वात्। यदि हि कर्त्ता देश-विशेषाभिज्ञः सन्स्वातन्त्र्येण कर्म नियुञ्ज्यात्, ततोऽनिष्ट-फलस्याप्रयोक्ता स्यात्।

आत्मनोऽन्यत्प्रवर्तकमनपेक्ष्य कर्म चेत् न फलं जनयति तर्हि कर्ता जीव एव प्रयोजकोऽस्तु इति शङ्कित्वा परिहरति - **कर्ता एव** इत्यादिना।

न च निर्निमित्तं तदनिच्छया आत्म-समवेतं तच्चर्मवत् विकरोति कर्म। न च आत्म-कृतम् अकर्तृ-समवेतम् अयस्कान्त-मणिवद् आकृष्ट भवति, प्रधान-कर्तृ-समवेतत्वात् कर्मणः।

अनिष्टफलभोगसिद्ध्यन्यथानुपपत्त्या कर्तुः कर्मनियोक्तृत्वं न सम्भवति चेत् तर्हि निर्निमित्तमेव कर्म फलाकारेण परिणमते इति जरत्कर्ममीमांसकानां (जरदिति प्राचीनेत्यर्थः। जीर्यतेः अतृन्। कर्मेति ब्रह्ममीमांसकव्यावृत्तये) मतम् आशङ्क्य आह - **न च निर्निमित्तम्** इति। कर्तुः अनिच्छया कर्म विकरोति इत्यत्र दृष्टान्ताभावत् चर्मणोऽपि विकारस्य सनिमित्तत्वादित्यर्थः (कर्मनिमित्तकस्य परम्परया इच्छानिमित्तकत्वं दुर्वारं कर्मणः इच्छामूलकत्वादिति भावः)। यच्च सौगतेन उच्यते फलकालपर्यन्तं कर्तुः अवस्थानाभावाद् न कर्तृसमवेतं कर्म किन्तु क्षणिकविज्ञानेन आत्मना कृतं कदाचित् फलस्य आकृष्ट भवति यथा अयस्कान्तो मणिः कदाचित् चेतनेन प्रयुक्तः (लोहाभिमुख्येन स्थापितः) अन्यदाऽपि (प्रयोगकालादन्यस्मिन् कालेऽपि, चेतनस्याभावेऽपि) लोहस्य प्रेरको भवति तद्वदिति तत्राह - **न च आत्मकृतम्** इति। करणादीनि कारकाणि यः प्रेरयन् करोति स प्रधानकर्ता (कारकेषु प्रधानश्च असौ कर्ता च)। तत्समवेतं कर्म प्रसिद्धं, तस्य (प्रधानस्य कर्तुः) च फलकालपर्यन्तं स्थायित्वम् एष्टव्यम्। अन्यथा अकृताभ्यागम-कृतविप्रणाश-प्रसङ्गात् (येन कर्त्रा कर्म कृतं स फलकाले नास्ति क्षणिकत्वात् तेन तत्कृतस्य कर्मणो नाशः इति कृतप्रणाशः। तथा च येन यत्फलं भुज्यते तत्कर्म तु तेन न कृतमिति अकृताभ्यागमः।) प्रत्यभिज्ञा-प्रामाण्याच्च (योऽहं कर्म अकरवं स एव फलं भुञ्जते इति प्रत्यभिज्ञायाः हानिप्रसङ्गश्च।) इत्यर्थः।

आक्षेपः भूताश्रयमिति चेत्।

समाधानम् न, साधनत्वात्। कर्त्तृ-क्रियायाः साधन-भूतानि भूतानि क्रिया-काले अनुभूत-व्यापाराणि, समाप्तौ च हलादिवत् कर्त्रा परित्यक्तानि, न फलं कालान्तरे कर्त्तुमुत्सहन्ते। न हि हलं क्षेत्राद् व्रीहीन् गृहं प्रवेशयति। भूत-कर्मणोश्च अचेतनत्वात् स्वतः प्रवृत्त्यनुपपत्तिः।

आक्षेपः वायुवदिति चेत्।

समाधानम् न, अप्रसिद्धत्वात्। न हि वायोरचितिमतः स्वतः प्रवृत्तिः सिद्धा, रथादिष्वदर्शनात्।

लोकायतिकाभिप्रायम् उद्भाव्य दूषयति - **भूताश्रयम्** इत्यादिना।

आक्षेपःशास्त्रात् कर्मण एवेति चेत्। शास्त्रं हि क्रियातः फल-सिद्धिमाह, नेश्वरादेः। स्वर्ग-कामो यजेत इत्यादि। न च प्रमाणाधिगतत्वाद् आनर्थक्यं युक्तम्। न च ईश्वरास्तित्वे प्रमाणान्तरमस्ति इति चेत्।

आधुनिककर्म मीमांसकानां मतमुद्भावयति - **शास्त्रात्** इत्यादिना। यजेतेत्याख्यातपदात् सामान्येन समीहितसाधनं यागः प्रतीयते (इष्टसाधनत्वमेव प्रवर्तमानत्वेन प्रतीयते)। कस्य समीहितस्य साधनमिति विशेषाकांक्षायां स्वर्गकाम-पद-संनिधानात् काम्यमान-स्वर्गसाधनत्वं यद्यपि (यागस्य) अवगम्यते तथापि (वृत्तिमात्ररूपतया) क्षणिकस्य यागस्य कालान्तरीय-स्वर्गसाधनत्वासम्भवाद् निष्फलत्वं (शास्त्रस्य) शङ्क्येत इत्याशङ्क्याह - **न च** इति।

औषधपानादेः कर्मणः स्थायिसंस्कारद्वारेण (स्थायिनः ये संस्काराः औषधस्य एव कालादिसंस्कृताः सूक्ष्मावयवाः तद्वारा) कालान्तरीयारोग्यादि-फलहेतुत्वप्रसिद्धेः यागस्य श्रुतसाधनत्व-निर्वाहाय स्थाय्यवान्तरापूर्वं परिकल्प्यते। तेन नत्वानर्थक्यं निर्दोषवाक्याधिगतत्वादित्यर्थः। श्रुतसाधनत्व-सिद्ध्यन्यथानुपपत्त्या किमिति ईश्वर एव नेष्यते तत्राह - **न च ईश्वरेति**। न इयमर्थापत्तिः ईश्वरास्तित्वे प्रमाणमन्यथापि उपपन्नत्वात्। न च मानान्तरमस्ति। तद्विषयश्रुत्यादेः (ईश्वरप्रतिपादकश्रुत्यादेः) अर्थवादत्वादित्यर्थः (कर्मणामेव फलदातृत्वेन राजादीश्वरतुल्येश्वरत्वेन स्तुतिपरत्वात्)।

**समाधानम्**

न, दृष्ट-न्याय-हानानुपपत्तेः। क्रिया हि द्वि-विधा दृष्ट-फला, अदृष्ट-फला च। दृष्ट-फलापि द्वि-विधा अनन्तर-फला, आगामि-फला च। अनन्तर-फला गति-भुजि-लक्षणा। कालान्तर-फला च कृषि-सेवादि-लक्षणा। तत्र अनन्तर-फला फलापवर्गिण्येव। कालान्तर-फला तूत्पन्न-प्रध्वंसिनी। आत्म-सेव्याद्यधीनं हि कृषि-सेवादेः फलं यतः। न च उभय-न्याय-व्यतिरेकेण स्वतन्त्रं कर्म, ततो वा फलं दृष्टम्। तथा च कर्म-फल-प्राप्तौ न दृष्ट-न्याय-हानम् उपपद्यते। तस्मात् शान्ते यागादि-कर्मणि नित्यः कर्तृ-कर्म-फल-विभागज्ञ ईश्वरः सेव्यादिवद् यागाद्यनुरूप-फल-दाता उपपद्यते। स च आत्म-भूतः सर्वस्य, सर्व-क्रिया-फल-प्रत्यय-साक्षी नित्य-विज्ञान-स्वभावः, संसार-धर्मैः असंस्पृष्टः।

न अपूर्वद्वारेण श्रुतनिर्वाहः कल्पनीयः। यद्व्यवहितफलं (व्यवहितं कालान्तरितं फलं यस्य कर्मणः तत्कर्म) कर्म तच्चैतन्यप्रयुक्तफलमिति दृष्टायाः (राजादिप्रयुक्ते भृत्यादिफले दृष्टायाः) व्याप्तेः हानिप्रसङ्गात्। अतः श्रुतसाधनत्व-सिद्ध्यन्यथानुपपत्त्या ईश्वरः फलदाता कल्पनीयः इत्याह - **न दृष्टेति**। संग्रहवाक्यं विवृणोति - **क्रिया हि** इत्यादिना। फलोदयेन अपवर्गो नाशो यस्याः सा फलापवर्गिणी न फलदातारं पृथग् (कर्तुः सकाशात्) अपेक्षते इत्यर्थः। **उत्पन्नप्रध्वंसिनि** इति। उत्पन्ना सती फलमदत्त्वैव प्रध्वंसते ततस्तत्र फलदाता कालान्तरे अपेक्ष्यते इत्यर्थः। यागादिफलं कर्माद्यभिज्ञेन दीयमानं व्यवहितफलत्वात् सेवाफलवदित्याह - **तस्माच्छान्ते यागादीनि** इति। ननु जीवस्तावत् स्वोपभोगसाधननियन्ता तस्यापि ईश्वरः फलदानेन नियन्ता चेदिष्यते तर्हि नियन्तुः स्वव्यतिरिक्तनियम्यत्वाङ्गीकाराद् ईश्वरस्यापि अन्यो नियन्ता प्रसज्येत (ईश्वरः स्वव्यतिरिक्तनियम्यः नियन्तृत्वाद् जीववदिति प्रयोगसम्भवात्) नियन्तृत्वाविशेषात्। अतोऽनवस्थाप्रसङ्गबाधितमनुमानम् इत्याशङ्क्याह - **स च आत्मभूतः सर्वस्य** इति। कल्पित-भेदमात्रेण नियम्यनियामकभावोपपत्तेः न तात्त्विकभेदावकाशः। तात्त्विकभेदवत्त्वे च घटादिवत् कार्यत्वादिप्रसङ्गः ततोऽतिरिक्त-नियम्यत्व-व्याप्त्यभावाद् न अनवस्थाप्रसङ्गः। राजवद् ईश्वरः फलदाता चेत् तर्हि निग्रहानुग्रह-कर्तृत्वाद् रागादिमान् स्यात् तत्राह - **सर्वक्रियाफलेति**। यथा लौकिकसाक्षी कस्यचिद् जयहेतुरन्यस्य पराजयहेतुरपि न रागादिमान् कथ्यते। यथोपलब्धभाषित्वात्। तथा ईश्वरः क्रियादिसाक्षी रागादिमान् न भविष्यति। अननुरूपादातृत्वात्। राजापि असाधून् दण्डयन् साधून् परिरक्षन् न रागादिमान् कथ्यते इति भावः। साक्षित्वे तर्हि ईश्वरस्य ईक्षणक्रिया स्यात् (तथा च विकारित्वादिदोषग्रासेन ईश्वरत्वमेव व्याहन्येत) तत्राह - **नित्येति**। नित्यविज्ञानस्वभावस्य अनिर्वाच्य-विषयावच्छेदेन साक्षित्वं कल्पितमित्यर्थः (न हि स्वप्नद्रष्टुः तदीक्षणक्रियया तात्त्विकः कश्चन विकारः इति।)। सर्वस्य जीवस्य आत्मभूतश्चेद् ईश्वरः तर्हि संसारधर्मैः लिप्येत संसार्यभेदाद् इत्याशङ्क्याह - **संसारेति**।

श्रुतेश्च। न लिप्यते लोक-दुःखेन बाह्यः (क. २.२.११), जरामृत्युमत्येति (बृ. ३.५.१), विजरो विमृत्युः (छा. ८.७.१), सत्यकामः सत्यसङ्कल्पः (छा. ८.७.१), एष सर्वेश्वरः (मा. ६), साधु कर्म कारयति (कौ. ३.९), अनश्नन् अन्योऽभिचाकशीति (श्वे. ४.६), एतस्य वा अक्षरस्य प्रशासने (बृ. ३.८.९) इत्याद्या असंसारिण एकस्यात्मनो नित्य-मुक्तस्य सिद्धौ श्रुतयः। स्मृतयश्च सहस्रशो विद्यन्ते। न चार्थवादाः शक्यन्ते कल्पयितुम्। अनन्य-योगित्वे सति विज्ञानोत्पादकत्वात्। न चोत्पन्नं विज्ञानं बाध्यते।

न केवलमुपपत्तेः ईश्वरसिद्धिः श्रुतेरपि इत्युक्तं ताः श्रुतीः उदाहरति - **न लिप्यते** इत्यादिना। स्मृतयश्च -यथा सर्वगतं सौक्ष्म्याद् आकाशं नोपलिप्यते (गी. १३.२२), समं सर्वेषु भूतेषु (गी. १३.२७), ईश्वरः सर्वभूतानां (गी. १८.६०) इत्याद्याः। यदुक्तमर्थवादत्वादप्रामाण्यं तत्राह - **न च** इति। ईश्वरविषयाणि वाक्यानि न

कर्मविधिसन्निधिसमाम्नातानि। अतोऽनन्यशेषत्वे सति बोधकत्वात् स्वार्थे प्रमाणानि कर्मविधिवाक्यवद् इत्यर्थः। किंच अर्थवादत्वेऽपि (अभ्युपगम्याप्याह। वज्रहस्तः पुरन्दरः इत्यादिवद् भूतार्थवादत्वस्य सम्भवात्) नाप्रामाण्यं पद-समन्वय-बलेन जायमानस्य ज्ञानस्य बाधादर्शनात् (कुतो बाधादर्शनमत आह - स्वतःप्रामाण्यादिति।) स्वतःप्रमाण्याद् अस्य बाधयिता नोपपद्यते इत्याह - **न च उत्पन्नम्** इति।

अप्रतिषेधाच्च। न चेश्वरो नास्तीति निषेधोऽस्ति।

आक्षेपसङ्ग्रहः (विवरणमधस्तात्) प्राप्त्यभावादिति चेत्।

**समाधान-सङ्ग्रहः (विवरणमधस्तात्)**

न, उक्तत्वात्।

आक्षेपस्य विवरणम् न हिंस्यात्इतिवत् प्राप्त्यभावात् प्रतिषेधो नारभ्यत इति चेत्।

समाधानस्य विवरणम् न, ईश्वर-सद्भावे न्यायस्योक्तत्वात्।

इतश्च नाप्रामाण्यम् इत्याह - **अप्रतिषेधाच्च** इति। यथा द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च इति प्रस्तुत्य नेति नेति इति परस्तात् प्रतिषेधति। नैवमीश्वरं प्रस्तुत्य प्रतिषेधः उपलभ्यते इत्यर्थः। प्रतिषेधाभावः ईश्वरसत्त्वाद् न भवति, किन्तु अप्राप्तत्वात्। यथा रागतः प्राप्ता भूतहिंसा निषिध्यते नैवम् ईश्वरस्य प्राप्तिः अस्ति इत्यन्यथासिद्धिम् (प्रतिषेधाभावस्य इत्यादेः) आशङ्क्य परिहरति - **प्राप्तीत्यादिना**।

अथवा अप्रतिषेधादिति कर्मणः फलदान ईश्वर-कालादीनां न प्रतिषेधोऽस्ति। न च निमित्तान्तर-निरपेक्षं केवलेन कर्त्रैव प्रयुक्तं फलदं दृष्टम्। न च विनष्टोऽपि यागः कालान्तरे फलदो भवति।

अप्रतिषेधाद् इति संग्रहवाक्यं प्राकारान्तरेण व्याचष्टे - **अथवा** इति। स्वर्गकामो यजेत इत्यादिशास्त्रं यागस्य फलदायिनीं शक्तिं द्योतयति। न सहकार्यन्तरं निषेधयति। वाक्यभेदप्रसङ्गादित्यर्थः। इतश्च (सर्वं वाक्यं सावधारणमिति नियमाद् याग एव स्वर्गसाधनमिति स्याद् अत आह - इतश्च इति) शास्त्रं अयोगव्यवच्छेदकं वाच्यं नान्ययोगव्यवच्छेदकम् (यागस्य स्वर्गसाधनत्वम् एव, न तु यागस्य एव स्वर्गसाधनत्वमिति। अन्ययोगव्यवच्छेदकत्वे सति वाक्यभेदः स्यात्। यागस्य स्वर्गसाधनत्वमिति एकः अर्थः, सहकारिणः स्वर्गसाधनत्वनिषेधः इति अन्यः अर्थः।)। स्रक्चन्दनवनितादि-निमित्तनिरपेक्षस्य कर्मणः फलहेतुत्वानुपलम्भात् (न हि मानान्तरविरुद्धं शक्यं प्रतिपादयितुम् अन्यथा विलम्बवाचकाभावाद् यागानन्तरमेव स्वर्गो भवति इत्यपि न कुतः स्यादिति भावः।)। अतो यथा मानान्तरसिद्धं स्रक्चन्दनवनितादेः निमित्तत्वमिष्टं तथा ईश्वरस्यापि एष्टव्यमित्याह - **न च निमित्तान्तरनिरपेक्षम्** इति। इतश्च ईश्वरः फलदाता वक्तव्यः। प्रध्वस्तस्य यागस्य कारणत्वासम्भवात्। नियतपूर्वक्षणसत्त्वं हि कारणत्वम्। न च अपूर्वाद्वारेण उपपद्यते। असति द्वारवति द्वारत्वानुपपत्तेः। न च औषधपानादिदृष्टान्तः। औषधाद्यवयवानां संस्कृतानां (संस्कारश्च तेषां कालादिकृतः ओराग्ययोग्यतारूपः परिपाकविशेषः इति) फलकालपर्यन्तम् अनुवर्तमानानामेव कालान्तरीयफलहेतुत्वाद् इत्यभिप्रेत्याह - **न च विनष्टः** इति।

**कर्मफलप्रदाने ईश्वरस्य प्राधान्यम्**

सेव्य-बुद्धिवत् सेवकेन सर्वज्ञेश्वर-बुद्धौ तु संस्कृतायां यागादि-कर्मणा विनष्टेऽपि कर्मणि सेव्याद् इव ईश्वरात् फलं कर्त्तुः भवति इति युक्तम्। न तु पुनः पदार्था वाक्य-शतेनापि देशान्तरे कालान्तरे वा स्वं स्वं स्वभावं जहति। न हि देश-कालान्तरेषु च अग्निरनुष्णो भवति। एवं कर्मणोऽपि कालान्तरे फलं द्वि-प्रकारमेवोपलभ्यते।

कथं तर्हि ईश्वरो वापि नष्टस्य (कर्मणः) फलदाता उपपद्यते तत्राह - **सेव्यबुद्धिवत्** इति। एतत्कर्म अनेनानुष्ठितम् इति कर्मणा (कर्मुप्रयुक्तायामिति यावत्) ईश्वरस्य बुद्धौ आरोहः (बुद्धिविषयीभावः कर्मणाम्। न तु ईश्वरः धर्माधर्माश्रयः।) एव कर्मणां संस्कारः तद्वशाद् विनष्टेऽपि कर्मणि ईश्वरात् फलं युक्तम्। यथा अनेन अहं सेवितः इति सेव्यबुद्धौ संस्कृतायां कालान्तरे विनष्टायामपि सेवायां सेव्याद्राजादेः फलं भवति तद्वदित्यर्थः। यद्यपि लौकिकानां कर्मणां फलसाधनत्वं चेतनाधीनं दृष्टं तथापि वैदिकस्य यागादेः फलं दातारं विनाऽपि वाक्यप्रामाण्याद् भविष्यति इति नाशङ्कनीयमित्याह - न तु पुनः इति। अन्वययोग्यानां (आकांक्षायोगयता अस्ति अन्वयस्य इति) पदार्थानां

संसर्गबोधकमेव वाक्यं, न तु त□लाद् दृष्टः पदार्थस्वभावः त्यक्तुं शक्यते इत्यर्थः (अन्यथा अग्निना सिञ्चेत् इति वाक्यबलादेव अग्नेः सेककरणत्वमभ्युपगम्येत इति भावः।)।

बीज-क्षेत्र-संस्कार-परिरक्षा-विज्ञानवत् कर्त्रपेक्ष-फलं कृष्यादि, विज्ञानवत् सेव्य-बुद्धि-संस्कारापेक्ष-फलं च सेवादि। यागादेः कर्मणः तथाऽविज्ञानवत्कर्त्रपेक्ष-फलत्वानुपपत्तौ, कालान्तर-फलत्वात्, कर्म-देश-काल-निमित्त-विपाक-विभाग-बुद्धि-संस्कारापेक्षं फलं भवितुमर्हति, सेवादि-कर्मानुरूप-फलज्ञ-सेव्य-बुद्धि-संस्कारापेक्ष-फलस्य इव। तस्मात् सिद्धः सर्वज्ञ ईश्वरः सर्व-जन्तु-बुद्धि-कर्म-फल-विभाग-साक्षी सर्व-भूतान्तरात्मा। यत्साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः (बृ. ३.४.१) इति श्रुतेः।

बीज-क्षेत्रयोः संस्कारः तत्परीक्षा च तद्विज्ञानवान् यः कर्ता तदेपक्षफलं कृष्यादि दृष्टम्। सेवादिकं च विज्ञानवान् यः सेव्यः तद्बुद्धिसंस्कारापेक्षफलं दृष्टम्। तथा यागादेः कर्मणः कालान्तरफलत्वाद् अविज्ञानवत्कर्त्रपेक्षफलत्वानुपपत्तौ कर्मादिविभागज्ञकर्त्रपेक्षफलत्वं भवितुमर्हति इत्यर्थः। लौकिककर्मसु अनेकविधेष्वपि मध्ये सेवायागादेः अनुरूपः दृष्टान्तः इत्यभिप्रेत्य पुनराह - **सेवादीति**। सेवादिकर्मानुरूपं फलं जानाति यः सेव्यः तद्बुद्धौ यः संस्कारः तदपेक्षफलस्य सेवादेः यथा न स्वातन्त्र्यं तद्वद् इत्यर्थः।

स एव च अत्र आत्मा जन्तूनां, नान्योऽतोऽस्ति द्रष्टा श्रोता मन्ता विज्ञाता, नान्यदतोऽस्ति विज्ञातृ(बृ. ३.८.११), इत्याद्यात्मान्तर-प्रतिषेध-श्रुतेः। तत्त्वमसि(छा. ६.८.७) इति चात्मत्वोपदेशात्। न हि मृत्पिण्डः काञ्चनात्मत्वेन उपदिश्यते।

एवं तावद् निरीश्वरवादिनं प्रति ईश्वरं प्रसाध्य सेश्वरवादिनामभिमत-वास्तव-भेदनिरासाय प्रक्रमते - **स एव** इति।

**ईश्वरात्मभेदनिरासः**

आक्षेपः ज्ञान-शक्ति-कर्मोपास्योपासक-शुद्धाशुद्ध-मुक्तामुक्त-भेदाद् आत्मभेद एवेति चेत्।

समाधानम् न, भेद-दृष्ट्यपवादात्।

पूर्वपक्षी यदुक्तं संसारिण ईश्वरादनन्या इति तन्न।

**सिद्धान्ती**

किं तर्हि

पूर्वपक्षी भेद एव संसार्यात्मनाम्।

**सिद्धान्ती**

कस्मात्पूर्वपक्षी लक्षणभेदाद् अश्व-महिषवत्।

**सिद्धान्ती**

कथं लक्षणभेदः इति

पूर्वपक्षी उच्यते - ईश्वरस्य तावद् नित्यं सर्व-विषयं ज्ञानं सवितृ-प्रकाशवत्। तद्विपरीतं संसारिणां खद्योतस्य इव। तथैव शक्ति-भेदोऽपि। नित्या सर्व-विषया च ईश्वर-शक्तिः। विपरीतेतरस्य। कर्म च चित्स्वरूपात्म-सत्ता-मात्र-निमित्तम् ईश्वरस्य। औष्ण्य-स्वरूप-द्रव्य-सत्ता-मात्र-निमित्त-दहन-कर्मवत्। राजाऽयस्कान्त-प्रकाश-कर्मवच्च स्वात्माविक्रिया-रूपम्। विपरीतमितरस्य। उपासीत इति वचनादुपास्य ईश्वरो गुरु-राजवत्। उपासकश्च इतरः शिष्य-भृत्यवत्। अपहत-पाप्मादि-श्रवणाद् (छा. ८.७.१) नित्य-शुद्ध ईश्वरः। पुण्यो वै पुण्येन (कर्मणा भवति) (बृ. ३.२.१३) इति वचनाद्विपरीत इतरः। अत एव नित्यमुक्त एव ईश्वरः। नित्याशुद्धि-योगाद् संसारी इतरः। अपि च यत्र ज्ञानादि-लक्षण-भेदोऽस्ति तत्र भेदो दृष्टः, यथा अश्व-महिषयोः। तथा ज्ञानादि-लक्षण-भेदाद् ईश्वरादात्मनां भेदोऽस्तीति चेत्।

**सिद्धान्ती**

न।

पूर्वपक्षी कस्मात्

**सिद्धान्ती**

अन्योऽसावन्योऽहमस्मीति न स वेद (बृ. १.४.१०) ते क्षय्य-लोका भवन्ति (छा. ७.२५.२), मृत्योः स मृत्युमाप्नोति (क. २.१.१०) इति भेद-दृष्टिर्हि अपोह्यते। एकत्व-प्रतिपादिन्यश्च श्रुतयः सहस्रशो विद्यन्ते।

जीवः ईश्वराद् भिन्नः तद्विरुद्धधर्माक्रान्तत्वात्। यो विरुद्धधर्माक्रान्तः स ततो भिन्नः यथा अश्वान् महिषः इत्यनुमानमुद्भाव्य तस्य भेदनिन्दानुपपत्त्यनुगृहीताभेदश्रुतिविरोधात् कालात्ययापदिष्टत्वमाह (बाधितत्वमिति यावत्) - **ज्ञानशक्तीत्यादिना**। संग्रहवाक्यं विवृणोति - **यदुक्तमित्यादिना**। स्वात्मनोऽविक्रियारूपं जगदुपादानादिलक्षणं (जगदुत्पादनादिलक्षणमित्यर्थः। तथा पाठ एव वा विपर्यासं गतः।) कर्म ईश्वरस्य इत्यर्थः।

यदुक्तं ज्ञानादि-लक्षण-भेदादिति अत्रोच्यते - न, अनभ्युपगमात्। बुद्ध्यादिभ्यो व्यतिरिक्ताः विलक्षणाश्च ईश्वराद्भिन्न-लक्षणा आत्मानो न सन्ति। एकः एव ईश्वरश्चात्मा सर्व-भूतानां नित्य-मुक्तोऽभ्युपगम्यते। बाह्यः चक्षुर्बुद्ध्यादि-समाहार-सन्तानाहङ्कार-ममत्वादि-विपरीत-प्रत्यय-प्रबन्धाविच्छेद-लक्षणः नित्य-शुद्ध-बुद्ध-मुक्त-विज्ञानात्मेश्वर-गर्भः, नित्य-विज्ञानावभासः, चित्त-चैत्य-बीज-बीजि-स्वभावः, कल्पितोऽनित्यविज्ञान ईश्वर-लक्षण-विपरीतोऽभ्युपगम्यते यस्याविच्छेदे संसार-व्यवहारः, विच्छेदे च मोक्ष-व्यवहारः।

दूषणान्तराभिधित्सया अनुवदति - **यदुक्तम्** इति। (विवरणमत-प्रतिबिम्बवादमाश्रित्याह जीवाः इति।) जीवाः किं बुद्ध्यादिविशिष्टाः चित्प्रतिबिम्बाः धर्मित्वेन गृह्यन्ते (भामतिमतावच्छेदवादेनाह - किं वा इति।) किं वा देवमनुष्यादिशब्दवाच्याः सचितिकाः देहाः किं वा तृतीयो विलक्षणनिरुपाधिकभेदभिन्नश्चेतनः (विलक्षणश्च असौ निरुपाधिकभेदेन भिन्नश्च इति नीललोहितवद् विशेषणयोः एव समासः)। आद्ये सिद्धसाधनत्वम् आह (अत्र स्वाभिमतम् ईश्वरादभिन्नं जीवस्वरूपं दर्शयन् इति शेषः) - **नानभ्युपगमात्** इत्यादिना। चित्तं - ज्ञानम्। चैत्याः - सुखादयः। बीजम् - अविद्यादि। बीजि - शरीरम्। तत्स्वभावः विशिष्टस्य विशेषणतादात्म्यादित्यर्थः। यस्य विशिष्टरूपस्य अविच्छेदे तत्प्रविष्टचित्स्वरूपस्य संसारव्यवहारः, यस्य च विच्छेदे प्रतिबिम्बरूपस्य बिम्बसम्पत्त्या मोक्षव्यवहारः भवति सः कल्पितरूपः पृथगभ्युपगम्यते अतः सिद्धसाधनमित्यर्थः।

अन्यश्च मृत्प्रलेपवत् प्रत्यक्ष-प्रध्वंसो देव-पितृ-मनुष्यादि-लक्षणो भूत-विशेष-समाहारः। न पुनः चतुर्थोऽन्यो भिन्न-लक्षण ईश्वराद् अभ्युपगम्यते। बुद्ध्यादि-कल्पितात्म-व्यतिरेकाभिप्रायेण तु लक्षण-भेदादिति आश्रयासिद्धो हेतुः।

द्वितीयविकल्पे अपि सिद्धसाधनत्वमाह - **अन्यश्च** इति। तृतीयविकल्पे बुद्ध्यादिकल्पितेभ्यः विशिष्टात्मभ्यः व्यतिरेकेण निरुपाधिकस्वरूपाभिप्रायेण पक्षीकरणे हेतुः आश्रयासिद्धः तादृशस्य अश्रयस्य मानविकलत्वाद् इत्यर्थः।

पूर्वपक्षी ईश्वराद् अन्यस्यात्मनोऽसत्त्वाद् ईश्वरस्यैव विरुद्ध-लक्षणत्वमयुक्तमिति चेत् सुख-दुःखादि-योगश्च।

**सिद्धान्ती**

न, निमित्तत्वे सति लोक-विपर्ययाध्यारोपणात् सवितृवत्। यथा हि सविता नित्य-प्रकाश-रूपत्वाद् लोकाभिव्यक्त्यनभिव्यक्ति-निमित्त्वे सति लोक-दृष्टि-विपर्ययेण उदयास्तमयाहोरात्रादि-कर्तृत्वाध्यारोपभाग् भवति। एवम् ईश्वरे नित्य-विज्ञान-शक्ति-रूपे लोक-ज्ञानापोह-सुख-दुःख-स्मृत्यादि-निमित्तत्वे सति लोक-विपरीत-बुद्ध्याऽध्यारोपितं विपरीत-लक्षणत्वं सुख-दुःखादयश्च, न स्वतः।

चोद्यं विवृण्वन्नाह - **ईश्वरादित्यादि**। ईश्वरादन्यः आत्मा नास्तीति वदता सर्वोपाधिस्थः ईश्वरः एव आत्मा इत्युक्तं भवति। तदा च बद्धत्वमुक्तत्वादिविरुद्धधर्मत्वं सुखदुःखादियोगश्च असङ्गस्य विरुद्धः प्रसज्येत। इत्यतः (समाधानभाष्यं स्फुटयन् वक्ति - वास्तवमित्यादि।) वास्तवमसंसारित्वं कल्पितेन संसारित्वेन न विरुध्यते (कल्पितेन सर्पत्वेन वास्तवं रज्जुत्वमिव) इति दर्शयितुं यस्य यस्य अन्तःकरणादि-विकारस्य (अन्तःकरणादीनामुपाधिभूतानां सुखदुःखादिविकाररूपस्य इत्यर्थः।) उदयादेः सन्निधिमात्रेण आत्मा निमित्तं तस्य तस्य

लोकैः अहंकारादिभिः (सामानाधिकरणे तृतीये) विपरीतरूपस्य अध्यारोपणाद् आत्मनः संसारित्वमित्याह - **न निमित्तत्वे सति** इत्यादिना। ईश्वरे सुखाद्यारोप इत्युक्ते मायोपाधिके ब्रह्मणि ईश्वरशब्दवाच्ये सुखाद्यध्यासशंका स्यात् तन्निवृत्यर्थमाह - **नित्यविज्ञानशक्तिरूप** इति। यथा अग्न्यादिशक्तिः शक्त्यन्तरमन्तरेण स्वस्वभावादेव कार्योत्पादनानुकूला तथा नित्यविज्ञानं स्वभाव-सन्निधिमात्रेण अन्तःकरणादि-प्रवृत्ति-निमित्तमिति शक्तिरूपमुच्यते। तस्मिन् स्वातन्त्र्याद् ईश्वर-पदलक्ष्ये (तस्मिन् ईश्वरपदलक्ष्ये इति सामानाधिकरणे विभक्ती। ईश्वरपदलक्ष्यत्वे हेतुः स्वातन्त्र्यादिति। अन्यानधीनत्सत्ताकत्वादिति।) विरुद्धानेकधर्माध्यासो न विरुध्यते इत्यर्थः। लोकस्य ज्ञानापोहो विस्मरणम्। **न स्वत** इति। न परमार्थतो विरुद्धानेकधर्मवत्त्वमित्यर्थः।

आत्म-दृष्ट्यनुरूपाध्यारोपाच्च। यथा घनादि-विप्रकीर्णेऽम्बरे येनैव सवितृ-प्रकाशो न दृश्यते स आत्म-दृष्ट्यनुरूपमेवाध्यस्यति, सवितेदानीमिह न प्रकाशयति इति सत्येव प्रकाशेऽन्यत्र भ्रान्त्या। एवम् इह बौद्धादि-वृत्त्युद्भवाभिभवाकुल-भ्रान्त्याऽध्यारोपितः सुख-दुःखादि-योग उपपद्यते।

भ्रान्तस्य स्वदृष्ट्यनुरूपाध्यासारोप-दर्शनाच्च नाध्यासो वस्तुक्षतिकरः (वस्तु - अधिष्ठानभूतम्) इत्याह - **आत्मदृष्टीति**। बौद्धादिवृत्तीनां उद्भवाभिभवाभ्यामाकुलस्य वैचित्यमापन्नस्य वृत्तीनामेव उद्भवाभिभवौ न तद्व्यापकचैतन्यस्य इति विवेकशून्यलोकस्य भ्रान्त्या इति योजना।

तत्स्मरणाच्च। तस्यैव ईश्वरस्यैव हि स्मरणम् - मत्तः स्मृतिर्ज्ञानमपोहनं च (गी. १५.१५), नादत्ते कस्यचित् पापम् (गी. ५.१५) इत्यादि। अतो नित्य-मुक्ते एकस्मिन् सवितरि इव लोकाविद्याध्यारोपितम् ईश्वरे संसारित्वम्, शास्त्रादि-प्रामाण्याद् अभ्युपगतमसंसारित्वम्, इत्यविरोध इति।

चैतन्यस्य ज्ञानसुखाद्युत्पादे निमित्तत्वं न केवलमन्वयव्यतिरेकसिद्धम्। तत्स्मरणाच्च भगवद्वाक्याच्च सिद्धमित्यर्थः। ईश्वरे संसारित्वम् ईश्वरः संसारी इति प्रसिद्ध्यभावाद् विशिष्टानुगतचित्स्वरूपे (विशिष्टे) इति व्याख्येयम्।

**आत्मनः एकत्वम्**

एतेन प्रत्येकं ज्ञानादि-भेदः प्रत्युक्तः। सौक्ष्म्य-चैतन्य-सर्वगतत्वाद्यविशेषे च भेद-हेत्वभावात्। विक्रियावत्वे चानित्यत्वात्। मोक्षे च विशेषानभ्युपगमात्। अभ्युपगमे च अनित्यत्व-प्रसङ्गात्। अविद्यावदुपलभ्यत्वाच्च भेदस्य तत्क्षये अनुपपत्तिरिति सिद्धम् एकत्वम्।

**एतेन** इति। सिद्धसाधनत्वादिदूषणेन प्रतिशरीरज्ञानसुखादीनामाश्रयभेदः तात्विकः प्रत्युक्तः मन्तव्यः। किंच व्यावर्तक-धर्मवशाद् व्यावृत्तिः सिध्यति। सांख्यमते च पुरुषाणां चैतन्यमात्रस्वरूपाणां न व्यावर्तको धर्मोऽस्ति। वैशेषिकमते तु अन्त्यविशेषकल्पना अन्योन्याश्रयपराहता। अतो निर्विशेषत्वात् पुंसां न भेदः तात्विकः इत्याह - **सौक्ष्म्येति**। कश्चिद् दुःखी कश्चिद् सुखी इति दुःखादिक्रिया-व्यवस्थान्यथानुपपत्त्या आश्रयभेदः तात्विकः कल्प्यते। तत्राह - **विक्रियावत्त्वे च** इति। सुखादिविक्रियाणामुपीधिधर्मत्वाद् न आत्मभेद-साधकत्वं व्यधिकरणसिद्धत्वादित्यर्थः। (विरुद्धमधिकरणं यस्य तत्। तच्च तत्सिद्धं च)। किं च न सर्वैः एव मोक्षं विक्रियादिविशेषः इष्यते। स्वरूपावस्थानं च मोक्षः। ततः सविशेषत्वं न स्वाभाविकमित्याह - **मोक्षे च** इति। किं च जाग्रत्स्वप्नयोः अविद्यावद्भिः भ्रान्तैः उपलम्भात् सुषुप्तिसमाध्योः भ्रान्त्यभावे अनुपलम्भाद् मिथ्यात्वं भेदस्य सिद्धमित्याह - **अविद्यावत्** इति। जीवानां क्रमेण अनेकशरीरानुयायित्वात् प्रातिभासिकस्य शरीरादिसन्तानस्य (अहंकारसंबन्धात् ) मिथ्याभिमानविषयत्वात् शुक्तिरूप्यवद् (तत्र तस्य इव इति षष्ठ्यन्ताद् इवार्थे वतिः) आज्ञानबीजस्य (ब्.व्री) विच्छेदे आत्मनः मोक्षसंज्ञेति सम्बन्धः।

तस्मात् शरीरेन्द्रिय-मनोबुद्धि-विषय-वेदना-सन्तानस्य अहङ्कार-सन्बन्धाद् अज्ञान-बीजस्य नित्य-विज्ञानान्यनिमित्तस्य आत्म-तत्त्व-याथात्म्य-विज्ञानाद्विनिवृत्तौ अज्ञान-बीजस्य विच्छेद आत्मनो मोक्ष-संज्ञा, विपर्यये च बन्ध-संज्ञा। स्वरूपापेक्षत्वादुभयोः।

ब्रह्म ह इत्यैतिह्यार्थः। पुरा किल देवासुर-सङ्ग्रामे जगत्-स्थिति-परिपिपालयिषया आत्मानुशासनानुवर्त्तिभ्यो देवेभ्यः अर्थिभ्योऽर्थाय विजिग्ये अजैषीदसुरान्। ब्रह्मण इच्छा-निमित्तो विजयो देवानां बभूवेत्यर्थः। तस्य ह ब्रह्मणो विजये देवा अमहीयन्त। यज्ञादि-लोक-स्थित्यपहारिष्वसुरेषु पराजितेषु देवा वृद्धिं पूजां वा प्राप्तवन्तः।

आत्मनः इति कस्मादुच्यते, विशिष्टस्य बन्धमोक्षौ किं नेष्यते तत्राह - **स्वरूपापेक्षत्वात्** इति। विशिष्टस्य मोक्षे अन्वयासम्भवाद् अन्वये वा संसारानिवृत्तिप्रसङ्गाद् अन्यस्य च बन्धे अन्यस्य च मोक्षे साधनवैयर्थ्याद् (वैयर्थ्यनिश्चयेन साधने प्रवृत्त्यनुपपत्तेः) उपाधिवैशिष्ट्यद्वारेण स्वरूपस्यैव उपाधिप्रतिबिम्बकल्पस्य (उपाधिसंबन्धात् प्रतिबिम्बतामिव आपन्नस्य। प्रतिबिम्बभावस्य स्वरूपे कल्पितत्वात् कल्पप्रयोगः।) बन्धमोक्षौ। प्रतिबिम्बो हि वाच्यरूपेण (विशिष्टरूपेण) मिथ्या (विशेषणस्य मिथ्यात्वात्) लक्ष्यरूपेण (निष्कृष्टविशेषणांशकत्वेन। निष्कृष्टम् पृथक्कृतम्।) तु बिम्बस्य इव इति स्वरूपावस्थानं मुक्तिः उपपद्यते। तदुक्तम् (सं.शरीरक ३.२७९) - उपाधिना (अन्तःकरणादिना) सार्धम् (साकम्) उपाधिजन्यमौपाधिकं (कर्तृत्वसुखदुःखादिकम्) सर्वम् (उपाधिसाहित्येन प्रतिबिम्बोऽपि मिथ्यैव औपाधिकत्वाविशेषात्) अवेहि मिथ्या। भागं मृषा चित्प्रतिबिम्बकेऽपि (बुद्ध्यादिविशिष्टे चित्प्रतिबिम्बे इत्यर्थः। भागं विशेषणांशं मृषा अवेहि इति सम्बन्धः।) बिम्बं पुनः सत्यमशेषमेव (बिम्बं चिन्मात्रं तस्य निर्भागत्वेऽपि अशेषत्वेक्तिः बिन्बत्व-प्रतिबिम्बत्व-कल्पनया। तथा च बिम्बात्मना प्रतिबिम्बात्मना च चिन्मात्रं तु सत्यमेव। नात्र विशिष्टवद् मिथ्याभागित्वमित्यर्थः। बिम्बं तु अशेषमेव सत्यमवेहि इत्यन्वयः)। इति (१)

**सूत्रवाक्यम्**

त ऐक्षन्त इति मिथ्या-प्रत्ययत्वाद् हेयत्व-ख्यापनार्थमाम्नायः।

**विवरणवाक्यम्**

ईश्वर-निमित्ते विजये स्व-सामर्थ्य-निमित्तः अस्माकमेवायं विजयोऽस्माकमेवायं महिमा इति आत्मनो जयादि श्रेयो-निमित्तं सर्वात्मानमात्मस्थं सर्व-कल्याणास्पदमीश्वरमेवात्मत्वेनाबुद्ध्वा पिण्ड-मात्राभि-मानाः सन्तो यं मिथ्या-प्रत्ययं चक्रुः तस्य पिण्ड-मात्र-विषयत्वेन मिथ्या-प्रत्ययत्वात् सर्वात्मेश्वर-याथात्म्यावबोधेन हातव्यता-ख्यापनार्थः तद्धैषाम् इत्याद्याख्यायिकाम्नायः। । १ ।।

त ऐक्षन्त इति देवानामीक्षणस्य मिथ्याप्रत्ययत्वाद् मिथ्याभिमानस्य हेयत्वख्यापनार्थः ब्रह्मणः प्रादुर्भावः इति याजना। सूत्रमिदं व्याख्याति - **ईश्वरनिमित्ते** इत्यादिना। जयादि श्रेष्ठत्वे निमित्तं मन्यमाना इति शेषः।

**३.२**

**त ऐक्षन्त अस्माकमेवायं विजयोऽस्माकमेवायं महिमेति। तद्धैषां विजज्ञौ।**

**तेभ्यो ह प्रादुर्बभूव। तन्न व्यजानत किमिदं यक्षमिति।। ३.२।।**

**ब्रह्मणो रूपविशेषेण प्रादुर्भावः**

तदा आत्म-संस्थस्य प्रत्यगात्मन ईश्वरस्य सर्वज्ञस्य सर्व-क्रिया-फल-संयोजयितुः प्राणिनां सर्व-शक्तेः जगतः स्थितिं चिकीर्षोः अयं जयो महिमा च इत्यजानन्तः ते देवाः ऐक्षन्त ईक्षितवन्तः अग्न्यादि-स्वरूप-परिच्छिन्नात्म-कृतः अस्माकमेवायं विजयः, अस्माकम् एवायं महिमा अग्नि-वाय्विन्द्रत्वादि-लक्षणो जय-फल-भूतः अस्माभिरनुभूयते, न अस्मत्प्रत्यगात्म-भूतेश्वर-कृतः इति एवं मिथ्याभिमानेक्षणवतां तद् ह किल एषां मिथ्येक्षणं विजज्ञौ विज्ञातवद् ब्रह्म।

सर्वेक्षितृ हि तत् सर्व-भूत-करण-प्रयोक्तृत्वात्। देवानां च मिथ्या-ज्ञानमुपलभ्य, मैव असुरवद् देवा

मिथ्याभिमानात् पराभवेयुः इति तदनुकम्पया देवान् मिथ्याभिमान-अपनोदनेन अनुगृह्णीयाम् इति

तेभ्यः देवेभ्यो ह किल अर्थाय प्रादुर्बभूव स्व-योग-माहात्म्य-निर्मितेन अत्यद्भुतेन विस्मापनीयेन

रूपेण देवानामिन्द्रिय-गोचरे प्रादुर्बभूव प्रादुर्भूतवत्। तत् प्रादुर्भूतं ब्रह्म न व्यजानत नैव विज्ञातवन्तो

देवाः किमिदं यक्षं पूज्यं महद्भूतम् इति।। ३.२ ।।

**आनन्दगिरिटीका**

स्वयोगमाहात्म्यनिर्मितेन सत्वरजस्तमसां त्रयाणां गुणानां योगो युक्तिः (योगो न संबन्धमात्रं तेषां तस्य सदातनत्वेन तादृशविचित्ररूपस्यापि तथात्वापाताद् अतो व्याचष्टे - युक्तिरिति। तां विशदयति - घटनमिति। यथापेक्षं गुणप्रधानीभावेन विवर्तनमिति यावत्। सा च माया यथा हि ऐन्द्रजालिको राजसादि-कतिपय-पदार्थान् क्रमकालविन्यासादिभेदैः घटयित्वा नानाविचित्रार्थान् दर्शयन् मायां करोति इत्युपचर्यते तद्वत्।) घटनं माया तन्माहात्म्येन इत्यर्थः। (२)

**वाक्यभाष्यम्**

तद् ब्रह्म ह किल एषां देवानामभिप्रायं मिथ्याहङ्कार-रूपं विजज्ञौ विज्ञातवत्। ज्ञात्वा च मिथ्याभिमान-शातनेन तदनुजिघृक्षया (तेभ्यः) देवेभ्योऽर्थाय तेषामेवेन्द्रिय-गोचरे नातिदूरे प्रादुर्बभूव महेश्वर-शक्ति-मायोपात्तेन अत्यन्ताद्भुतेन प्रादुर्भूतं किल केनचिद्रूप-विशेषेण। तत् किल उपलभमाना अपि देवा न व्यजानत न विज्ञातवन्तः, किमिदं यदेतद्यक्षं पूज्यमिति।। २ ।।

## ३.३

**तेऽग्निमब्रुवन् जातवेद एतद्विजानीहि किमेतद्यक्षमिति। तथेति।। ३.३ ।।**

ते तदजानन्तो देवाः सान्तर्भयाः तद्विजिज्ञासवः अग्निम् अग्र-गामिनं जात-वेदसं सर्वज्ञ-कल्पं अब्रुवन्

उक्तवन्तः।

हे जातवेद एतद् अस्मद्-गोचरस्थं यक्षं विजानीहि विशेषतो बुध्यस्व।

त्वं नः तेजस्वी। किमेतद्यक्षमिति। तथा अस्तु इति।। ३.३ ।।

**आनन्दगिरिटीका (३-१२)**

तृतीयखण्डशेषभाष्यं स्पष्टमतो न विवृतमिति। (३-१२)

**वाक्यभाष्यम् (३-१०)**

तद्विज्ञानायाग्निमब्रुवन्। तृणनिधानेऽयमभिप्रायः - अत्यन्त-सम्भावितयोरग्नि-मारुतयोः तृण-दहनादानाशक्त्या आत्म-सम्भावना शातिता भवेदिति।। ३-१० ।।

**३.४**

**तदभ्यद्रवत् तमभ्यवदत्। कोऽसीति।**

**अग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति।। ३.४ ।।**

तद् यक्षम् अभि अद्रवत् तत्प्रति गतवानग्निः।

तं च गतवन्तं पिपृच्छिषुं तत्समीपे अप्रगल्भत्वात् तूष्णीं-भूतं तद्यक्षम् अभ्यवदत् अग्निं प्रति अभाषत। कोऽसीति। एवं ब्रह्मणा पृष्टोऽग्निः अब्रवीत् अग्निर्वा अग्निनाम अहं प्रसिद्धो जातवेदाः इति च नाम-द्वयेन प्रसिद्धतया आत्मानं श्लाघयन् इति।। ३.४ ।।

**३.५**

**तस्मिंस्त्वयि किं वीर्यमिति।**

**अपीदँ्सर्वं दहेयं यदिदं पृथिव्यामिति।। ३.५ ।।**

एवमुक्तवन्तं ब्रह्म अवोचत् तस्मिन् एवं प्रसिद्ध-गुण-नामवति त्वयि किं वीर्यं सामर्थ्यम् इति।

सोऽब्रवीत् इदं जगत् सर्वं दहेयं भस्मी-कुर्यां यदिदं स्थावरादि पृथिव्यामिति।

पृथिव्यामित्युपलक्षणार्थम्, यतोऽन्तरिक्षस्थमपि दह्यत एवाग्निना।। ३.५ ।।

**३.६**

**तस्मै तृणं निदधावेतद्दहेति। तदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुम्।**

**स तत एव निववृते। नैतदशकं विज्ञातुं यदेतद्यक्षमिति।। ३.६ ।।**

तस्मै एवमभिमानवते ब्रह्म तृणं निदधौ पुरः अग्नेः स्थापितवत्। ब्रह्मणा एतत् तृण-मात्रं ममाग्रतः दह, न चेदसि दग्धुं समर्थः, मुञ्च दग्धृत्वाभिमानं सर्वत्र इत्युक्तः तत् तृणम् उपप्रेयाय तृण-समीपं गतवान् सर्वजवेन सर्वोत्साह-कृतेन वेगेन गत्वा तद् न शशाक नाशकद् दग्धुम्। स जातवेदाः तृणं दग्धुमशक्तो व्रीडितो हत-प्रतिज्ञः तत एव यक्षादेव तूष्णीं देवान् प्रति निववृते निवृत्तः प्रतिगतवान्। न एतद् यक्षम् अशकं शक्तवानहं विज्ञातुं विशेषतः यदेतद्यक्षमिति।। ३.६ ।।

**३.७-१०**

**अथ वायुमब्रुवन् वायवेतद्विजानीहि किमेतद्यक्षमिति। तथेति।। ३.७ ।।**

**तदभ्यद्रवत् तमभ्यवदत्। कोऽसीति। वायुर्वा अहमस्मीत्यब्रवीत्।**

**मातरिश्वा वा अहमस्मीति।। ३.८ ।।**

**तस्मिंस्त्वयि किं वीर्यमिति।**

**अपीदँ्सर्वम् आददीय यदिदं पृथिव्यामिति।। ३.९ ।।**

**तस्मै तृणं निदधावेतदादत्स्वेति। तदुपप्रेयाय सर्वजवेन तन्न शशाकादातुम्।**

**स तत एव निववृते। नैतदशकं विज्ञातुं यदेतद्यक्षमिति।। ३.१० ।।**

अथ अनन्तरं वायुमब्रुवन्।

हे वायो एतद्विजानीहि इत्यादि समानार्थं पूर्वेण।

वानाद्, गमनाद्, गन्धनाद्वा वायुः।

मातर्यन्तरिक्षे श्वयतीति मातरिश्वा।

इदं सर्वम् अपि आददीय गृह्णीयां यदिदं पृथिव्याम् इत्यादि समानमेव।। ३.७-१० ।।

**३.११**

**अथ इन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति।**

**तथेति। तदभ्यद्रवत्। तस्मात्तिरोदधे।। ३.११ ।।**

अथ इन्द्रमब्रुवत् मघवन्नेतद्विजानीहि इत्यादि पूर्ववत्। इन्द्रः परमेश्वरो मघवा बलवत्त्वात्। तथेति।

तदभ्यद्रवत्। तस्माद् इन्द्राद् आत्म-समीपं गतात् तद् ब्रह्म तिरोदधे तिरोभूतम्।

इन्द्रस्य इन्द्रत्वाभिमानोऽतितरां निराकर्त्तव्य इत्यतः संवादमात्रमपि नादाद् ब्रह्म इन्द्राय।। ३.११ ।।

**वाक्यभाष्यम्**

इन्द्रः आदित्यः वज्रभृद् वा अविरोधात्। इन्द्रोपसर्पणे ब्रह्म तिरोदध इत्यत्रायमभिप्रायः - इन्द्रः अहम् इत्यधिकतमोऽभिमानोऽस्य सः अहमग्न्यादिभिः प्राप्तं वाक्-सम्भाषण-मात्रमप्यनेन न प्राप्तोऽस्मि इत्यभिमानं कथं नु नाम जह्यादिति तदनुग्रहाय एवान्तर्हितं तद् ब्रह्म बभूव।। ११ ।।

**३.१२**

**स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमा ँ्हैमवतीम्।**

**ता ँ्होवाच किमेतद्यक्षमिति।। ३.१२ ।।**

तद्यक्षं यस्मिन्नाकाशे आकाश-प्रदेशे आत्मानं दर्शयित्वा तिरोभूतम्, इन्द्रश्च ब्रह्मणः तिरोधान-काले

यस्मिन्नाकाशे आसीत् स इन्द्रः तस्मिन्नेवाकाशे तस्थौ, किं तद्यक्षमिति ध्यायन्।

न निववृतेऽग्न्यादिवत्। तस्येन्द्रस्य यक्षे भक्तिं बुद्ध्वा विद्या उमारूपिणी प्रादुरभूत् स्त्री-रूपा।

स इन्द्रः ताम् उमां बहुशोभमानाम्। सर्वेषां हि शोभमानानां शोभनतमा विद्या।

तदा बहुशोभमानेति विशेषणमुपपन्नं भवति।

हैमवतीं हेम-कृताभरणवतीम् इव बहुशोभमानामित्यर्थः।

अथवा उमैव हिमवतो दुहिता हैमवती।

नित्यमेव सर्वज्ञेन ईश्वरेण सह वर्त्तते इति ज्ञातुं समर्थेति कृत्वा ताम् उपजगाम इन्द्रः।

तां ह उमां किल उवाच पप्रच्छ - ब्रूहि किमेतद् दर्शयित्वा तिरोभूतं यक्षमिति।। ३.१२ ।।

**वाक्यभाष्यम्**

स शान्ताभिमान इन्द्रः, अत्यर्थं ब्रह्म विजिज्ञासुः, यस्मिन्नेवाकाशे ब्रह्मणः प्रादुर्भावः आसीत् तिरोधानं च तस्मिन्नेव स्त्रियमतिरूपिणीं विद्यामाजगाम। अभिप्रायोद्बोध-हेतुत्वाद् रुद्रपत्न्युमा हैमवती इव सा शोभमाना विद्यैव। विरूपोऽपि विद्यावान् बहु शोभते।। १२ ।।

# अध्याय ४

## ४.१

**सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति।**

**ततो हैव विदाञ्चकार ब्रह्मेति।। ४.१ ।।**

**पदभाष्यम्**

सा ब्रह्मेति होवाच ह किल ब्रह्मणो वै ईश्वरस्यैव विजये - ईश्वरेणैव जिता असुराः।

यूयं तत्र निमित्तमात्रम्। तस्यैव विजये - यूयं महीयध्वम् महिमानं प्राप्नुथ।

एतद् इति क्रिया-विशेषणार्थम्। मिथ्याभिमानस्तु युष्माकम् अस्माकमेवायं विजयोऽस्माकमेवायं महिमा इति। ततः तस्मादुमावाक्याद् ह एव विदाञ्चकार ब्रह्मेति इन्द्रः। अवधारणात् ततो हैव इति, न स्वातन्त्र्येण।। ४.१ ।।

## वाक्यभाष्यम्

तां च पृष्ट्वा तस्या एव वचनाद् विदाञ्चकार विदितवान्। अत इन्द्रस्य बोध-हेतुत्वाद् विद्यैव उमा। विद्या-सहायवानीश्वर:इति स्मृतिः।। ४.१।।

**आनन्दगिरिटीका (१-३)**

विद्येति सत्त्वप्रधाना शक्तिः (अन्तःकरणवृत्तिभेदः। हेतुत्वाभिप्रायेण शक्तित्वोक्तिः।) चित्तादात्म्यापत्त्या (तादात्म्येन चिदभिव्यक्तिनिमित्तत्वाद् वृत्तेः इति यावत्।) बोधहेतुः (बोधः यथोक्तवृत्त्यभिव्यक्ता चित्।)। (१-३)

## ४.२

यस्माद् अग्निर्वाय्विन्द्रा एते देवा ब्रह्मणः संवाद-दर्शनादिना सामीप्यमुपगताः -

**तस्माद् वा एते देवाः अतितरामिवान्यान्देवान् यदग्निर्वायुरिन्द्रस्ते**

**ह्येनन्नेदिष्ठं पस्पृशुः। ते ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति।। ४.२ ।।**

**ब्रह्मज्ञानस्य दृष्टं फलम्**

तस्माद् स्वैर्गुणैः अतितरामिव शक्ति-गुणादि-महा-भाग्यैः अन्यान् देवान् अतितराम् अतिशेरते इव

एते देवाः। इव शब्दोऽनर्थकोऽवधारणार्थो वा।

यदग्निर्वायुरिन्द्रः ते हि देवा यस्माद् एनद् ब्रह्म नेदिष्ठम् अन्तिकतमं प्रियतमं पस्पृशुः स्पृष्टवन्तो

यथोक्तैः ब्रह्मणः संवादादि-प्रकारैः।

ते हि यस्माच्च हेतोः एनद् ब्रह्म प्रथमः प्रथमाः प्रधानाः सन्त इत्येतत्।

विदाञ्चकार विदाञ्चक्रुः इति एतद् ब्रह्म इति।। ४.२ ।।

**वाक्यभाष्यम् (२-३)**

यस्मादिन्द्र-विज्ञान-पूर्वकम् अग्नि-वाय्विन्द्राः ते ह्येनद् नेदिष्ठम् अति-समीपं ब्रह्म-विद्यया ब्रह्म प्राप्ताः सन्तः पस्पृशुः स्पृष्टवन्तः, ते हि प्रथमः प्रथमं विदाञ्चकार विदाञ्चक्रुः इत्येतत्। तस्माद् अतितराम् अतीत्यान्यानतिशयेन दीप्यन्ते अन्यान् देवान्। ततोऽपि इन्द्रोऽतितरां दीप्यते, आदौ ब्रह्म-विज्ञानात्।। २-३ ।।

**आनन्दगिरिटीका**

तस्मादित्यस्य (तदादिवाक्यस्य) अपेक्षितं (स ह्येनदित्यादिवाक्यम् इति शेषः। हेतुगर्भत्वाद् अपेक्षिततत्वादित्यर्थः।) पाठव्यत्यासेन (उत्तरपठितं पूर्वं पूर्वपठितमुत्तरम् इत्यर्थः।) व्याचष्टे - **यस्मात्** इत्यादिना। अर्थवादोपसंहारोऽयं (अयमिति - तस्मादित्यादिना कृतः) विध्युपक्रमार्थम् (तस्यैष इत्यादिनोपक्रमो विधेः तदर्थमित्यर्थः। अर्थवादस्य विधिशेषत्वादिति भावः।)। (३)

**४.३**

यस्मादग्नि-वायू अपि इन्द्र-वाक्यादेव विदाञ्चक्रतुः, इन्द्रेण हि उमा-वाक्यात् प्रथमं श्रुतं ब्रह्मेति अतः

-

**तस्माद् वा इन्द्रः अतितरामिवान्यान्देवान् स ह्येनन्नेदिष्ठं पस्पर्श।**

**स ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति।। ४.३ ।।**

**इन्द्रस्य सर्वदेवश्रेष्ठत्वे हेतुः**

तस्माद् वै इन्द्रः अतितराम् इव अतिशेरत इव अन्यान्देवान्।

स ह्येनन्नेदिष्ठं पस्पर्श।

यस्मात् स ह्येनत्प्रथमो विदाञ्चकार ब्रह्म इति उक्तार्थं वाक्यम्।। ४.३ ।।

**४.४**

**तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा३ इतीन्व्यमीमिषदा३**

**इत्यधिदैवतम्।। ४.४ ।।**

**देवता-विषयः ब्रह्मण उपासनोपदेशः**
तस्य प्रकृतस्य ब्रह्मणः एष आदेशः उपमोपदेशः।

निरुपमस्य ब्रह्मणो येनोपमानेन उपदेशः सोऽयमादेश इत्युच्यते।

किं तत् यदेतत् प्रसिद्धं लोके विद्युतो व्यद्युतत्।

विद्योतनं कृतवत् इत्येतदनुपपन्नमिति विद्युतो विद्योतनम् इति कल्प्यते।

आ ३ इत्युपमार्थः। विद्युतो विद्योतनम् इव इत्यर्थः।

यथा सकृद् विद्युत्तम् (बृ. २.३.६) इति श्रुत्यन्तरे च दर्शनात्।

विद्युद् इव हि सकृदात्मानं दर्शयित्वा तिरोभूतं ब्रह्म देवेभ्यः।

अथवा विद्युतः तेजः इत्यध्याहार्यम्। व्यद्युतद् विद्योतितवत् आ ३ इव।

विद्युतः तेजः सकृद् विद्योतितवद् इव इत्यभिप्रायः। इति-शब्दः आदेश-प्रतिनिर्देशार्थः।

इत्ययमादेश इति। इत्-शब्दः समुच्चयार्थः। अयं च अपरस्तस्यादेशः। कोऽसौ न्यमीमिषत्। यथा चक्षुः न्यमीमिषद् निमेषं कृतवत्। स्वार्थे णिच्। उपमार्थ एव आकारः। चक्षुषो विषयं प्रति प्रकाश-तिरोभाव इव चेत्यर्थः। इति अधिदैवतं देवता-विषयं ब्रह्मण उपमान-दर्शनम्।। ४.४ ।।

**आनन्दगिरिटीका**

विद्युतः[५.१] सकाशाद् विद्योतनं कृतवद् इत्यनुपपन्नं, ब्रह्मणः स्वयंज्योतिष्ट्वात् पराधीनप्रकाशानुपपत्तेः। (विद्युतः इति षष्ठ्यन्त-ग्रहणे) विद्युत्संबन्धि द्योतनं कृतवदिति (विद्युत्संबन्धिप्रकाशस्य ब्रह्मनिष्ठत्वायोगात्) अनुपपन्नम् अन्याश्रयस्य विद्योतनस्य अन्यकर्तृकत्वानुपपत्तेः। अतः यथाश्रुतासम्भवाद् अन्यत्र तात्पर्यं वक्तव्यमित्यर्थः। **प्रतिनिर्देशार्थ** इति। परामर्शार्थः। चक्षुषो निमेषणं द्रुतं भवति इति प्रसिद्धम्। तद्वद् ब्रह्मणि क्षिप्रकारित्वं सृष्ट्यादौ प्रतिबन्धाभावेन आयासाभावेन च द्रुतकारित्वं धर्मोऽधिदैवतम् (देवताशब्दार्हसगुणब्रह्माश्रितः)। (उपासनोपदेशेन विधित्सितं सगुणब्रह्मोपासनं स्पष्टयन्नाह - यदिति) यद् ध्येयं ब्रह्म तद्यथा विद्युतः प्रकाशो युगपद् विश्वव्यापकः तथा निरतिशयज्योतीरूपं द्रुतं सकलसृष्ट्यादिकारि पारमैश्वर्यसम्पन्नम् इत्युपमानोपदेशेनोक्तम्। (४)

**वाक्यभाष्यम्**

तस्यैष आदेशः। तस्य ब्रह्मणः एषः वक्ष्यमाण आदेशः उपासनोपदेशः इत्यर्थः। यस्माद् देवेभ्यः विद्युद् इव सहसैव प्रादुर्भूतं ब्रह्म द्युतिमत् तस्माद् विद्युतो विद्योतनं यथा यदेतद् ब्रह्म व्यद्युतद् विद्योतितवत्। आ इव इत्युपमार्थः आ-शब्दः। यथा घनान्धकारं विदार्य विद्युत् सर्वतः प्रकाशते एवं तद् ब्रह्म देवानां पुरतः सर्वतः प्रकाशवद् व्यक्ती-भूतम्। अतो व्यद्युतद् इव इत्युपास्यम्। यथा सकृद्विद्युत्तम् (बृ. २.३.६) इति च वाजसनेयके।

यस्माच्च इन्द्रोपसर्पण-काले न्यमीमिषत्। यथा कश्चिच्चक्षुर्निमेषणं कृतवान् इति। इतीत्-इत्यनर्थकौ निपातौ। निमिषितवद् इव तिरोभूतम्। इति एवम् अधिदैवतं देवताया अधि यद्दर्शनमधिदैवतं तत्।। ४ ।।

**आनन्दगिरिटीका**

विद्युद्-दृष्टान्तेन अत्यन्तदीप्तिमत्वं निमेषणदृष्टान्तेन देवैरपि दुर्ज्ञेयत्वमिति गुणद्वयं देवानधिकृत्य (निमित्तीकृत्य) विवक्षितम्। अत एव तद्गुणद्वयविशिष्टोपासनमाधिदैविकमुच्यते। (४)

**४.५**

**अथाध्यात्मं यदेतद् गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्ण ँसङ्कल्पः।।**

**४.५।।**

**प्रत्यगात्म-विषयः ब्रह्मण उपासनोपदेशः**

अथ अनन्तरम् अध्यात्मं प्रत्यगात्म-विषयः आदेश उच्यते।

यदेतद् गच्छतीव च मनः एतद् ब्रह्म ढौकते इव विषयी-करोति इव।

यत् च अनेन मनसा एतद् ब्रह्म उपस्मरति समीपतः स्मरति साधकः।

अभीक्ष्णं भृशं सङ्कल्पः च मनसो ब्रह्म-विषयः।

मन-उपाधिकत्वाद् हि मनसः सङ्कल्प-स्मृत्यादि-प्रत्ययैरभिव्यज्यते ब्रह्म, विषयी-क्रियमाणम् इव।

अतः स एष ब्रह्मणोऽध्यात्ममादेशः।

विद्युन्निमेषणवद् अधिदैवतं द्रुत-प्रकाशन-धर्मि, अध्यात्मं च मनः-प्रत्यय-सम-कालाभिव्यक्ति-धर्मि -

इत्येष आदेशः। एवमादिश्यमानं हि ब्रह्म मन्द-बुद्धि-गम्यं भवतीति ब्रह्मण आदेशोपदेशः।

न हि निरुपाधिकमेव ब्रह्म मन्द-बुद्धिभिराकलयितुं शक्यम्।। ४.५ ।।

**आनन्दगिरिटीका**

अधुना प्रत्यगात्मतया ब्रह्मणो यथा अभिव्यक्तिः स्यात् तथा उपदिश्यते इत्याह - **अथानन्तरम्** इति। एतत्प्रकृतं ज्योतीरूपं ब्रह्म प्रति मदीयं मनो गच्छद्वर्त्तते इति चिन्तयेदिति य उपदेशः स आध्यात्मिकः। अभीक्ष्णं पौनःपुन्येन (जायमानं) मम मनसः संकल्पो ब्रह्मविषय एव इति ध्यायतः प्रत्यग्भूतब्रह्माभिव्यक्तिः स्यादित्याह - **मनउपाधिकत्वात्** इति। उक्तमर्थं संक्षिप्याह - **विद्युन्निमेषणवत्** इति। (५)

**वाक्यभाष्यम्**

अथ अनन्तरमध्यात्मम्। आत्म-विषयमध्यात्मम्, उच्यते इति वाक्य-शेषः। यदेतद् यथोक्त-लक्षणं ब्रह्म गच्छति इव प्राप्नोति इव, विषयी-करोति इव इत्यर्थः। न पुनः विषयी-करोति, मनसोऽविषयत्वाद् ब्रह्मणः। अतो मनो न गच्छति। येनाहुर्मनो मतम्(के. १.५) इति हि चोक्तम्। गच्छति इव इति तु मनसोऽपि मनस्त्वात्। आत्म-भूतत्वाच्च ब्रह्मणः तत्समीपे मनो वर्त्तते इति। उपस्मरति अनेन मनसैव तद् ब्रह्म विद्वान् यस्मात् तस्माद् ब्रह्म गच्छति इव इत्युच्यते। अभीक्ष्णं पुनः पुनः च सङ्कल्पः ब्रह्म-प्रेषितस्य मनसः। अत उपस्मरण-सङ्कल्पादिभिः लिङ्गैः ब्रह्म मनोऽध्यात्म-भूतम् उपास्यम् इत्यभिप्रायः।। ५ ।।

**आनन्दगिरिटीका**

अहंग्रहेणैव एतत्कर्तव्यमित्यभिप्रेत्य आध्यात्मिकब्रह्मरूपमाह - **आत्मेत्यादिना**। (५)

**४.६**

**तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाभिहैनँ् सर्वाणि**

**भूतानि संवाञ्छन्ति।। ४.६ ।।**

तद् ब्रह्म ह किल तद्वनं नाम तस्य वनं तद्वनं, तस्य प्राणि-जातस्य प्रत्यगात्म-भूतत्वाद् वनं वननीयं

सम्भजनीयम्। अतः तद्वनं नाम।

प्रख्यातं ब्रह्म तद्वनमिति यतः तस्मात् तद्वनमिति अनेनैव गुणाभिधानेन उपासितव्यं चिन्तनीयम्।

अनेन नाम्ना उपासनस्य फलमाह - स यः कश्चिद् एतद् यथोक्तं ब्रह्म एवं यथोक्त-गुणं वेद उपास्ते

अभि ह एनम् उपासकं सर्वाणि भूतानि अभि संवाञ्छन्ति ह प्रार्थयन्ते एव, यथा ब्रह्म।। ४.६ ।।

**वाक्यभाष्यम्**

तस्य च अध्यात्ममुपासने गुणो विधीयते - तद्ध तद्वनम्। तद् एतद् ब्रह्म तच्च तद्वनं च तत्परोक्षं वनं सम्भजनीयम्। वनतेः तत्कर्मणः तस्मात् तद्वनं नाम। ब्रह्मणो गौणं हीदं नाम। तस्मादनेन गुणेन तद्वनमित्युपासितव्यम्। स यः कश्चित् एतद् यथोक्तम् एवं यथोक्तेन गुणेन वनमित्यनेन नाम्ना अभिधेयं ब्रह्म वेद उपास्ते तस्यैतत्फलमुच्यते। सर्वाणि भूतानि एनम् उपासकम् अभिसंवाञ्छन्ति इह अभिसम्भजन्ते सेवन्ते स्मेत्यर्थः। यथागुणोपासनं हि फलम्।। ६ ।।

**आनन्दगिरिटीका**

**वनतेः तत्कर्मणः** इति। वन सम्भजने (भ्वादि ४६३) इत्यस्य धातोः सम्भजनार्थस्य रूपं वनम् इति। तत्प्रसिद्धं वनं (अरण्यम्) न गृह्यते इत्यर्थः। **गौणमिति**। (गुणादागतम् गौणम्। यौगिकम्।)। अवयव-शक्ति-लभ्यं न रूढ्या समुदायशक्त्या (लभ्यम्) (न वाचकम्) इत्यर्थः। (६)

**४.७**

एवमनुशिष्टः शिष्यः आचार्यमुवाच -

**उपनिषदं भो ब्रूहि इत्युक्ता त उपनिषद् ब्राह्मीं वाव त उपनिषदमब्रूमेति।।**

**४.७ ।।**

उपनिषदं रहस्यं यच्चिन्त्यं भो भगवन् ब्रूहि इति।

एवमुक्तवति शिष्ये आह आचार्यः उक्ता अभिहिता ते तव उपनिषत्।

का पुनः सेत्याह - ब्राह्मीं ब्रह्मणः परमात्मनः इयं ब्राह्मी तां परमात्म-विषयत्वादतीत-विज्ञानस्य वाव

एव ते उपनिषदमब्रूम इति। उक्तामेव परमात्म-विषयामुपनिषदमब्रूम इत्यवधारयत्युत्तरार्थम्।

**तपःप्रभृतीनां ब्रह्मविद्यायाः अशेषत्वप्रतिपादनम्**

परमात्म-विषयामुपनिषदं श्रुतवत उपनिषदं भो ब्रूहि इति पृच्छतः शिष्यस्य कः अभिप्रायः यदि

तावच्छ्रुतस्यार्थस्य प्रश्नः कृतः, ततः पिष्ट-पेषणवत् पुनरुक्तोऽनर्थकः प्रश्नः स्यात्।

अथ सावशेषा उक्ता उपनिषत्स्यात् ततस्तस्याः फलवचनेनोपसंहारो न युक्तः प्रेत्यास्माल्लोकादमृता

भवन्ति (के. २.५) इति।

तस्मादुक्तोपनिषच्छेषविषयोऽपि प्रश्नः अनुपपन्न एव, अनवशेषितत्वात्।

कस्तर्ह्यभिप्रायः प्रष्टुरित्युच्यते। किं पूर्वोक्तोपनिषच्छेषतया तत्सहकारि-साधनान्तरापेक्षा, अथ

निरपेक्षैव। सापेक्षा चेदपेक्षित-विषयामुपनिषदं ब्रूहि।

अथ निरपेक्षा चेदवधारय पिप्पलादवद् नातःपरमस्ति इत्येवमभिप्रायः। एतदुपपन्नमाचार्यस्यावधारण-

वचनम् उक्ता ते उपनिषत् इति।

**आक्षेपः**

ननु नावधारणमिदं, यतोऽन्यद्वक्तव्यमाह तस्यै तपो दमः इत्यादि।

**समाधानम्**

सत्यं वक्तव्यमुच्यते आचार्येण, न तु उक्तोपनिषच्छेषतया तत्सहकारि-साधनान्तराभिप्रायेण वा।

किन्तु ब्रह्म-विद्या-प्राप्त्युपायाभिप्रायेण। वेदैः तदङ्गैश्च सहपाठेन समीकरणात् तपः-प्रभृतीनाम्।

न हि वेदानां शिक्षाद्यङ्गानां च साक्षाद् ब्रह्म-विद्या-शेषत्वं तत्सहकारि-साधनत्वं वा सम्भवति।

**आक्षेपः**

सहपठितानामपि यथा-योगं विभज्य विनियोगः स्यादिति चेत्।

यथा सूक्त-वाकानुमन्त्रण-मन्त्राणां यथा-दैवतं विभागः, तथा तपो-दम-कर्म-सत्यादीनामपि ब्रह्म-विद्या-शेषत्वं, तत्सहकारि-साधनत्वं वेति कल्प्यते।

वेदानां तदङ्गानां चार्थ-प्रकाशकत्वेन कर्मात्म-ज्ञानोपायत्वम् इति।

एवं ह्ययं विभागो युज्यते अर्थ-सम्बन्धोपपत्ति-सामर्थ्यादिति चेत्।

**समाधानम्**

न, अयुक्तेः। न ह्ययं विभागो घटनां प्राञ्चति।

न हि सर्व-क्रिया-कारक-फल-भेद-बुद्धि-तिरस्कारिण्या ब्रह्म-विद्यायाः शेषापेक्षा, सहकारि-साधन-

सम्बन्धो वा युज्यते।

सर्व-विषय-व्यावृत्त-प्रत्यगात्म-विषय-निष्ठत्वाच्च ब्रह्म-विद्यायाः, तत्पलस्य च निःश्रेयसस्य।

‘मोक्षमिच्छन् सदा कर्म त्यजेदेव ससाधनम्।

त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम्‘ (भाल्लवीश्रुतिः)।

तस्मात् कर्मणां सहकारित्वं कर्म-शेषापेक्षा वा न ज्ञानस्योपपद्यते। ततोऽसदेव सुक्तवाकानुमन्त्रणवद्

यथा-योगं विभागः इति। तस्माद् अवधारणार्थतैव प्रश्न-प्रतिवचनस्योपपद्यते।

एतावती एव इयमुपनिषद् उक्ताऽन्य-निरपेक्षा अमृतत्वाय्।। ४.७ ।।

**आनन्दगिरिटीका**

सगुणब्रह्मोपासनमैश्वर्यफलकमुक्तम् (अवान्तरतात्पर्यमादाय आह - सगुणेति)। तत्र (ऐश्वर्ये) विरक्तः उत्तमाधिकारी परमरहस्यं पृच्छति इत्याह - **एवमनुशिष्टः** इति। परमरहस्यं (उपनिषत्पदस्य अर्थम्) श्रोत्रस्य श्रोत्रमित्यादिना उक्तमेव उत्तरार्थमिति उत्तरग्रन्थेन विद्याप्राप्त्युपाय-विधानार्थम् (इत्थमनवधारणे हि विधास्यमानानां तपःप्रभृतीनां विद्यासहकारितया मोक्षप्राप्त्युपायत्वं शङ्क्येत इति भावः) उक्ता विद्या निरपेक्षैव (मोक्षं प्रति सहकारिसाधनान्तरानपेक्षैव) इत्यवधारयति। अवधारणार्थत्वं प्रतिवचनस्य चोद्यमुखेन स्फुटयति - **परमात्मविषयाम्** इत्यादिना। किं पूर्वोक्तोपनिषच्छेषतया अन्यदपेक्षते। शेषशब्देन फलोपकार्यङ्गं (यथा दर्शादेः प्रायाजादि) विवक्षितम्। सहकारिशब्देन अनुपसर्जनमपि (अनङ्गः। यथा दर्शपौर्णमासौ एव मिथः) समुच्चयार्हं विवक्षितम्। एवं शिष्याभिप्रायमुपवर्ण्य समाधानमाह - **एतदुपपन्नम्** इति। विद्याङ्गत्वहीनैः सह (वेद-वेदाङ्गैः सह) पाठात् तपःप्रभृतीनां विद्याङ्गत्वं नास्ति इत्युक्तम्। तत्र योग्यतावशेन शेषशेषिभावः, सहपाठः तु अकिंचित्करः इति शङ्कते - **सहपठितानामपि** इति। अग्निरिदं हविरजुषतावीवृधत महो ज्यायोऽकृत। अग्नीषोमाविदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्राताम् इत्यादिना एव सूक्तवाकेन सर्वयागसमाप्तौ देवतानुमन्त्रणं क्रियते। तत्र यद्यपि अस्मिन् सूक्तानुवाके बह्व्यो देवताः पठ्यन्ते तथापि यस्मिन् यागे या देवता आहूता तस्या एव विसर्जने योग्यतावशाद् अस्य सूक्तवाकस्य यथा विनियोगः तथा तपः प्रभृतीनामेव विद्याशेषत्वेन विनियोगः भविष्यति इत्यर्थः। भवेत्सूक्तवाकस्य विनियोगः योग्यतासम्भवात्। न कर्मणां विद्याविरुद्धत्वेन योग्यतायाः अयोग्यत्वाद् इत्याह - **न अयुक्तेः** इति। विद्याया विषयपर्यालोचनया फलपर्यालोचनया च नास्ति तत्वतः संबन्धयोग्यता। प्रत्युत कर्मणामनुपयोगात् कर्मणां त्याग एव मुमुक्षुणा कर्तव्य इत्याह - **सर्वविषयेति**। सर्वेभ्यः उत्पाद्यादिभ्यः कर्मगोचरेभ्यः व्यावृत्तो यः प्रत्यगात्मा स एव ब्रह्मरूपेण विद्यायाः (कर्मादिभ्यः) व्यावर्तकः विषयः, तन्निष्ठत्वाद् विद्यायाः तत्फलस्य च कर्मवैलक्षण्यादित्यर्थः (कर्मफलवैलक्षण्यादिति यावत्)।

**वाक्यभाष्यम्**

उपनिषदं भो ब्रूहि इत्युक्तायामप्युपनिषदि शिष्येणोक्त आचार्य आह - उक्ता कथिता ते तुभ्यम् उपनिषद् आत्मोपासनं च। अधुना ब्राह्मीं वाव ते तुभ्यं ब्रह्मणो ब्राह्मण-जातेः उपनिषदम् अब्रूम वक्ष्यमाम इत्यर्थः। वक्ष्यति हि। ब्राह्मी नोक्ता। उक्ता त्वात्मोपनिषत्। तस्माद् न भूताभिप्रायोऽब्रूम इत्ययं शब्दः।। ७ ।।

**आनन्दगिरिटीका**

**ब्राह्मणजातेः उपनिषदम्** इति। ब्राह्मणजात्यनुष्ठेयां (सत्वाधिक्याद् ब्राह्मणेन सुखानुष्ठानाम्। सुखेन अनुष्ठानं यस्याः विद्याः ताम्।) विद्याम् आत्मज्ञानसाधनभूताम् इत्यर्थः। (७)

**४.८**

**तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनम्।। ४.८ ।।**

यामिमां ब्राह्मीमुपनिषदं तवाग्रेऽब्रूम तस्यै तस्या उक्ताया उपनिषदः प्राप्त्युपाय-भूतानि तप-आदीनि।

तपः कायेन्द्रिय-मनसां समाधानम्। दमः उपशमः। कर्म अग्निहोत्रादि।

एतैर्हि संस्कृतस्य सत्त्व-शुद्धि-द्वारा तत्त्व-ज्ञानोत्पत्तिर्दृष्टा।

दृष्टा ह्यमृदित-कल्मषस्य उक्तेऽपि ब्रह्मणि, अप्रतिपत्तिर्विपरीत-प्रतिपत्तिश्च, यथेन्द्र-विरोचन-प्रभृतीनाम्। तस्मादिह वा अतीतेषु वा बहुषु जन्मान्तरेषु तप-आदिभिः कृत-सत्त्व-शुद्धेः ज्ञानं समुत्पद्यते यथा-श्रुतम्।

‘यस्य देवे परा-भक्तिः यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।।‘ (श्वे. ६.२३) इति मन्त्र-वर्णात्। ‘ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः‘ (म.भा.शां. २०४.८) इति स्मृतेश्च।

इति-शब्दः उपलक्षणत्व-प्रदर्शनार्थः। इति एवमाद्यन्यदपि ज्ञानोत्पत्तेरुपकारकम् ‘अमानित्वमदम्भित्वम्‘ (गी. १३.७) इत्याद्युपदर्शितं भवति।

प्रतिष्ठा पादौ, पादौ इव अस्याः।

तेषु हि सत्सु प्रतितिष्ठति ब्रह्म-विद्या, प्रवर्त्तते पद्भ्याम् इव पुरुषः।

वेदाः चत्वारः सर्वाणि च अङ्गानि शिक्षादीनि षट्।

कर्म-ज्ञान-प्रकाशकत्वाद् वेदानां, तद्रक्षणार्थत्वाद् अङ्गानां, प्रतिष्ठात्वम्।

अथवा प्रतिष्ठा-शब्दस्य पाद-रूप-कल्पनार्थत्वाद् वेदाः तु इतराणि सर्वाङ्गानि शिर-आदीनि।

अस्मिन् पक्षे शिक्षादीनां वेद-ग्रहणेनैव ग्रहणं कृतं प्रत्येतव्यम्।

अङ्गिनि हि गृहीते अङ्गानि गृहीतान्येव भवन्ति, तदायत्तत्वादङ्गानाम्।

सत्यम् आयतनं यत्र तिष्ठत्युपनिषत् तदायतनम्।

सत्यमिति अमायिता अकौटिल्यं वाङ्-मनः-कायानाम्।

तेषु ह्याश्रयति विद्या ये अमायाविनः साधवः, न आसुर-प्रकृतिषु मायाविषु।

'न येषु जिह्ममनृतं न माया च' (प्र. १.१६) इति श्रुतेः। तस्मात् सत्यमायतनमिति कल्प्यते।

तप-आदिषु एव प्रतिष्ठात्वेन प्राप्तस्य सत्यस्य पुनरायतनत्वेन ग्रहणं साधनातिशयत्व-ज्ञापनार्थम्।

'अश्वमेध-सहस्रं च सत्यं च तुलया धृतम्। अश्वमेध-सहस्राच्च सत्यमेकं विशिष्यते' (विष्णुस्मृतिः

८) इति स्मृतेः।। ४.८ ।।

**आनन्दगिरिटीका**

तच्छब्दापेक्षितं यच्छब्दं पूरयति - **यामिमाम्** इति। प्राप्तिः सगुणविषया निर्गुणब्रह्मात्मविषया च इत्यर्थः। **पादरूपकल्पना** इति। प्रसिद्धपादसामान्यस्य कल्पितत्वाद् इतरैरप्यङ्गैः कल्पनारूपैः भवितव्यमित्यर्थः। तस्यै तपो दमः कर्मेत्यत्रत्येतिशब्दस्य उपलक्षणार्थत्वात् सत्यमपि संग्रहीतव्यं कथं पृथगुच्यते इत्याशङ्क्याह - **तपआदिष्वेव** इति।

**वाक्यभाष्यम्**

तस्या वक्ष्यमाणायाः उपनिषदः तपः ब्रह्मचर्यादि, दमः उपशमः, कर्म अग्निहोत्रादि इति एतानि प्रतिष्ठा आश्रयः। एतेषु हि सत्सु ब्राह्म्युपनिषत् प्रतिष्ठिता भवति। वेदाः चत्वारः अङ्गानि च सर्वाणि। प्रतिष्ठेत्यनुवर्त्तते। ब्रह्माश्रया हि विद्या। सत्यं यथा-भूत-वचनमपीडा-करम् आयतनं निवासः। सत्यवत्सु हि सर्वं यथोक्तम् आयतने इव अवस्थितम्।। ८ ।।

**आनन्दगिरिटीका**

ब्रह्मेति वेदः तन्मूलत्वात् तदाश्रया। (८)

**४.९**

**यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये**

**प्रतितिष्ठति प्रतितिष्ठति।। ४.९ ।।**

यो वै एतां ब्रह्म-विद्यां केनेषितम् इत्यादिना यथोक्ताम् एवं महा-भागां, ब्रह्म ह देवेभ्यः इत्यादिना स्तुतां, सर्व-विद्या-प्रतिष्ठां वेद अमृतत्वं हि विन्दते इत्युक्तमपि ब्रह्म-विद्या-फलमन्ते निगमयति - अपहत्य पाप्मानम् अविद्या-काम-कर्म-लक्षणं संसार-बीजं विधूय अनन्ते अपर्यन्ते स्वर्गे लोके सुखात्मके ब्रह्मणि इत्येतत्। अनन्ते इति विशेषणान्न त्रिविष्टपे। अनन्त-शब्दः औपचारिकोऽपि स्याद् इत्यत आह - ज्येये इति। ज्येये ज्यायसि सर्व-महत्तरे स्वात्मनि मुख्ये एव प्रतितिष्ठति। न पुनः संसारमापद्यत इत्यभिप्रायः।। ४.९ ।।

**आनन्दगिरिटीका**

सगुणविद्यायाः क्रममुक्त्यर्थत्वात् क्रमेण प्राप्यं यत्कैवल्यं निर्गुणविद्याफलं तत्पूर्वोक्तमिह उपसंह्रियते इत्याह - **यो वा एताम्** इत्यादिना।

**वाक्यभाष्यम्**

ताम् एतां तप-आद्यङ्गां तत्प्रतिष्ठां ब्राह्मीमुपनिषदं सायतनम् आत्म-ज्ञान-हेतु-भूताम् एवं यथावद् यो वेद अनुवर्त्ततेऽनुतिष्ठति, तस्यैतत्फलमाह - अपहत्य पाप्मानम् अपक्षीय धर्माधर्मौ इत्यर्थः। अनन्ते अपारे, अविद्यमानान्ते स्वर्गे लोके सुख-प्राये निर्दुःखात्मनि परे ब्रह्मणि ज्येये महति सर्व-महत्तरे प्रतितिष्ठति सर्व-वेदान्त-वेद्यं ब्रह्म आत्मत्वेन अवगम्य तदेव ब्रह्म प्रतिपद्यते इत्यर्थः।। ९ ।।

**आनन्दगिरिटीका**

तपआदीनि वेदाङ्गान्यन्याङ्गानि यस्याः। सत्यकामः स्वयं सिद्धः सर्वेशो यः स्वशक्तितः स एवान्तःप्रविष्टोऽहम् उपास्यः सर्वदेहिनाम्।। (९)

**ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुःश्रोत्रमथो**

**बलमिन्द्रियाणि च सर्वाणि। सर्वं ब्रह्मौपनिषदम्।**

**माहं ब्रह्म निराकुर्याम्। मामा ब्रह्म निराकरोत्।**

**अनिराकरणमस्त्वनिराकरणं मे अस्तु।**

**तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु।**

**ते मयि सन्तु।।**

**ॐ शान्तिः शान्तिः शान्तिः ।।**